CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 125.
૧૨૫

Title KARMASAMUCCAYA.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 125. Subject: Dharmaśāstra

Title: Karma Samuccaya.

Author: — Scribe: —

Date of the work: — Date of the Ms.: V.S. 1766

Place of the work: — Place of the Ms.: —

Size: 9.5" by 4.4" Extent: 85 ff. 58 to 61 are missing

Language: Sanskrit. Script: Devanāgarī.

Remarks: incomplete. ff. 58 to 61 missing. see Ms. No 124.

ॐ नमः श्रीगणेशाय ॥ गृहकर्म लिख्यते ॥ ॐ अस्यां भूमौ गृहं कर्त्तुं वांछति ॥ अपवानिःपन्ने
गृहे पिउडुंबरशाखया त्रिःपरिलिखन् । इह हान्नाद्याय॰मि । इति मंत्रेण गृहमध्ये
स्थंडिलं कृत्वा आचमनादि आज्यभागांतं कृत्वा । ॐ कोसि कस्यासि॰ स्वाहा ॥ १ ॥ अ
स्यां देवानामसि॰ तरेण स्वाहा ॥ २ ॥ इति जुहोति । स्विष्टकृदादि शेषं समापनीयं ॥
ततो गृहं सूत्रयित्वा । पूर्वस्यां दिशि द्वारं कल्पयित्वा गर्त्तौ खानयेत् । ततो दक्षिणस्यां
दिशि द्वारप्रदेशे एवमेव । पश्चिमायां दिशि एवमेव । एवमुत्तरस्यां दिशि मध्ये एकगर् २
त्तः । नवगर्त्तानि खादयित्वा तेषु नवगर्त्तेषु उदकं सर्पिमिश्रं प्रक्षिप्य । ततः ॐ नवय
इमस्वेकार्यैमिंड पः॰ ॐ इमेव च । स्थंडिलं रुद्रकलशं मृत्तिज्ञां वरणादिकं ॥ १ ॥ कुशं

डी भूमिसंस्कार पूर्व विधिश्रयणांतिका । स्थापनं च गृहादीनां पूजा संक्षेपतस्ततः ॥ २ ॥
अग्निनाभिधारणाद्याज्यभागांताच कुशंडिका । समिदाज्यं चरुणां च होमस्त्रिलयवैः क्र
मात् ॥ ३ ॥ पंचांगरुद्रजपनं तद्धोमश्च दशांशकः । ग्रहपूजार्घदानं च प्रार्थनार्चनकल्प
ना ॥ ४ ॥ वह्निपूजा बलेर्दानं पूर्णाहुतिरतः परं । स्विष्टकृत्पूर्विका बर्हिर्होमांता च कु
शंडिका ॥ ५ ॥ होमस्य दक्षिणानां च भूयस्याश्चैव कल्पनं । अभिषेकादिमांगल्यं तार्य
पुत्रान्वितस्य च ॥ ६ ॥ प्रणीतानां विमोकादि शांत्यंताच कुशंडिका । विसर्जनं ग्रहादीनां
पदार्पनामयं क्रमः ॥ ७ ॥ स्थानगोत्रमविज्ञाय होमं यः कुरुते द्विजः । न तत्फलमवाप्नोति
न तं भुष्यति तेग्रहाः ॥ ८ ॥ अर्कोज्जातः कलिंगेषु यामुनेषु च चंद्रमाः । अंगारकस्तथावं

त्या बुधो विकोशलेस्मृतः ॥९॥ शुक्रो भोजकटे जातः पश्चाद्देशे बृहस्पतिः ॥ शनैश्चरश्च सौरा
ष्ट्रे राहुर्बर्बरकस्तथा ॥१०॥ पर्वतान्पर्वतेचैव ज्ञाताः सर्वत्र केतवः ॥ काश्यपसगोत्रमादि
त्याय ॥ आत्रेयसगोत्रं सोमाय ॥ भारद्वाजगोत्रमंगारकस्य ॥ आत्रेयसगोत्रं बुधस्य ॥ आं
गिरसगोत्रं बृहस्पतेः ॥ कौरव्यसगोत्रं शुक्रस्य ॥ काश्यपसगोत्रं शनैश्चरस्य ॥ जैमिनिस
गोत्रं राहोः ॥ पैठीनसगोत्रं केतूनां ॥ गुरुद्विजस्यैश्च भृगुनंदनश्च ॥ कृत्तं चसूर्योधर
णीसुतश्च ॥ विश्यः शशांकः शशिनंदनश्च ॥ शेषाश्च नक्षत्रा गगने चरा मताः ॥ आदि २
त्यस्य विशाखेभं चंद्रस्यैव तु कृत्तिका ॥ पूर्वाषाढा धरासूनोर्द्धनिष्ठैव बुधस्य भं ॥ गु
रोरुत्तरफाल्गुन्यो शुक्रस्य पुष्यनक्षत्रं ॥ शनैश्चरो रोहिणीश्च राहोर्नैरृतिरूच

ति ॥ केतूनां च तथाश्लेषा नक्षत्राणि स्मृतानि हि ॥ सप्तम्यां भास्करो जातो ऽष्टम्यां भा
स्करनंदनः ॥ नवम्यां भार्गवो जातो दशम्यां मंगलस्तथा ॥ एकादश्यां गुरुर्जातो द्वा
दश्यां सोमनंदनः ॥ सोमः पक्षत्र चतुर्दश्यां पौर्णमास्यां च तद्रिपुः ॥ यावद्दर्दुं न पश्यं
ति तावज्ञातास्तु केतवः ॥ आदित्ये कपिलो नाम पिंगलः सोम उच्यते ॥ धूम्रकेतुस्त
था भौमे जठराग्निर्बुधे स्मृतः ॥ गुरौ चैव शिखी नाम शुक्रे भवति हाटकः ॥ शनैश्च
रमहातेजा राहौ केतौ हुताशनः ॥ अथ विधिः ॥ मंडपः षोडशहस्तं तः ॥ चतुरस्रं
कुंडं ॥ चतुरस्रं हस्तविस्तारं सर्वतः ॥ अंगुली रत्न च ब्रूयः ॥ एवंविधं कर्तव्यं ॥ मुष्टि
ना त्रिंशता द्विविंशति चारत्निमात्रं ॥ सहस्त्रे त्वपशोन व्ये कुर्यात्कुंडं करात्मकं ॥ द्विहस्तमयु

ततेतच्चलक्षहोमेचतुःकरं। अष्टहस्तात्मकंकुंडं कोटिहोमे ततोधिकं। मुष्टिमा
त्रमितिबद्धमुष्टिहस्तमात्रमित्यर्थः। ततोवरणं। आचार्यो ब्राह्मण ग्रहाणां। जाप
कोतस्यप्रकारः। उदङ्मुखोयजमानउपविशति। आचार्यःपूर्वाभिमुखः। तत्रयज
मानःप्रयोगंपठति। अद्यश्रीब्रह्मणोद्वितीयेपरार्द्धेश्रीश्वेतवाराहकल्पेवैवस्वत
मन्वंतरेअष्टाविंशतितमकलियुगप्रथमविभागेश्रीमन्नृपविक्रमार्कसमयस्य
एकादशात्यधिकषट्दशशतसंवत्सरेषुसमतिक्रांतेषुअमुकनाम्निसंवत्स ३
रेउत्तरायनगतेश्रीसूर्येअमुकऋतौअमुकमासेअमुकपक्षे। अमुकतिथौअमु
कदिनेअमुकनक्षत्रेअमुकयोगेअमुककरणेअमुकस्थेचंद्रेअमुकस्थेसवि

तरिअमुकस्थेदेवगुरौशेषेषुग्रहेषुयथास्थानस्थितेषुसत्सु। एवंगुणविशिष्टे
पुण्येकालेजंबूद्वीपेभारतवर्षेआर्यावर्त्तांतर्गतब्रह्मावर्त्तैकदेशेकुमारि
काक्षेत्रांतर्वर्त्तिनि श्रीसोमेश्वरक्षेत्रेमशानघाःश्रीतपत्याःदक्षिणेतटेअस्मि
न्मकलकल्याणवतिपुण्यमंडपायतनेदेवब्राह्मणानांचसन्निधौएवंगुणवि
शिष्टेपुण्येकालेदेशेच। मुनस्यविवाहोत्सवकर्मप्रारंभनिमित्तंसर्वारिष्टपरि
हारार्थंसर्वकामसमृध्यर्थंसर्वदुरितोपशांत्यर्थंअविघ्नेनकर्मणःसिध्यर्थंचश्री
गणेशांबिकयोःप्रीत्यर्थंआदित्यादिनवग्रहाणांप्रीत्यर्थंआदित्यादिनवग्रहा
णांसानुकूलार्थंनवग्रहशांतिकर्मणिअमुकवेदमूर्त्तेआचार्यएतत्तेपाद्यं।

एष वो अर्घः। पूजा। स्वस्ति न इन्द्रो०। पादप्रक्षालनं। आचमनं। नवग्रहशांतिक
र्मणि अमुकवेदमूर्त्तेर्ऋत्विज एतत्ते पाद्यं। एष वो अर्घः। पूजा। स्वस्ति न इन्द्रो०।
पादप्रक्षालनं। आचमनं। एवं सर्वेषां। अमुकवेदमूर्त्तेर्जापक एतत्ते पाद्यं। इत्यादि।
आत्मपादप्रक्षालनं। आचमनं। ततः ॐ उयये आचार्यः पूर्वाग्निमुखः उपविशेत्।
यजमानश्चोत्तराग्निमुखः आचमनं प्राणायामः। पुनराचमनं। स्वस्ति नो मिमीता०
संगमेमहि। श्रीगणेशाय नमः॥ १॥ अपवित्रः पवित्रो वा० शुचिः। इदं विष्णु०रे। सप्त ५
व्याधा०। नमः स्वाहायै स्वाहायै० स्पर्शाश्च वरणमात्रोपहाराणां स्क०। ॐ तत्०त्। उ
पास्मै० मधु३। अत्राद्य० अमुकमासे अमुकपक्षे अमुकतिथौ अमुकदिने। य

था वर्त्तमान० एवंगुण० थो। ऋतुस्य विवाहोत्सव० पंच। आदित्यादिनवग्रहाणां
प्रीत्यर्थं। आदित्यादि० सानुकूलार्थं। नवग्रहशांतिकर्मणि आचार्यप्रमुखाणां
ऋत्विग्जापकस्य वरणमहं करिष्ये। कुरुष्वेति ब्राह्मणाः। अमुकसगोत्र अ
मुकशर्मन् धेनवाग्नक्षदक्षिणेन स्थालीपाकेनाहं यक्ष्ये तत्र त्वामाचार्यं वृणे।
वृणीहि इत्याचार्यः वृतोस्मि इति वा। ब्राह्मणान् अत्र युष्मान् ऋत्विग्जापकान् वृ
णे। वृणीहि इति सर्वे वृतास्मि इति वा। ब्राह्मणान् अत्र चंदनादिपूजा। यथा पादं०र्चनं।
पं आचार्यप्रमुखऋत्विग्जापकेभ्योऽहं संप्रददे। यो यस्य विनागः स प्रतिगृह्यतां। इमा
३ नि अर्च्चितानि ज्योतींषि। अर्चनविधेः परिपूर्णतास्तु। आचमनं। ॐ भूर्भुवः स्वः अस्म

मीमदं त॰ हरीः। यवप्रक्षेपः। यथा दास्यमाना निवृत्तिपर्यंतानि भोजनानि आचा
र्यप्रमुखेभ्यो ऽहं संप्रददे। योयस्य विभागस्तं प्रतिगृह्यतां। पुण्याहं दीर्घमायुरस्तु।
शिवा आपः सं॰। सौमनस्य पुष्पमस्तु। अक्षतं चारिष्टं चास्तु। दीर्घमा॰ पुष्टि॰ तुष्टि॰
धन॰ इष्टसंप॰ अनिष्ट॰ यत्पापं॰ द्विपद चतु॰। अस्य ऋत्विग्ज्ञापकवरणकर्मणः
प्रतिष्ठा॰ व्यं। आचार्य॰ भ्यो ऽहं संप्रददे। योयस्य॰। ॐ दक्षिणाः पां॰। बहुदेयं चास्तु। दी
र्घमायु॰ यद्यच्छ्रे॰ तिथि॰ आदित्या॰ प्रजापतिः॰ स्थावरसंयो॰ बहु॰ उत्तरे क॰ अनि ५
वाद॰ पुण्याहं भवंतो ब्रुवंतु। ऋद्धिं॰ कल्याणं॰ स्वस्ति भवंतु। अस्य ऋत्विग्ज्ञापकव
रणकर्मणो यन्न्यूनातिरिक्तं। गृहे वृद्धि॰ उत्तरे क॰। यजमानस्य मांगल्यं आशीर्वादः।

यजमानो नालिकेरं गृहीत्वा। अस्य यागस्य निःपत्त्यै भवंतो ऽभ्यर्थिता मया। सुप्रस
न्नं प्रकर्तव्यं शांतिकं विधिपूर्वकं॥१॥ इति वरणं॥ ततः कुशंडी। बर्हिर्ब्रह्मा प्रणीता
पवित्रे स्थः। छेदन्या आज्यं धान्यं च चरुस्थाली स्रुवः स्रुक् च मेक्षणं समिधः। उपयश॰
पूर्णपात्रं चेत्येतानि ॐ उत्तरतः। प्राक्संस्थान्यासादयेत्॥ आचमनं प्राणाया
मः। स्वस्त्ययनं। पंचभूसंस्कारा अग्निप्रणयनं परिसमूहनमाघाटकं ब्रह्मासनं प्रणी
तासनमात्मासनं अग्नेर्दक्षिणतो ब्रह्मस्थापनं। भूर्भुवःस्वरिति पुष्पैरर्चनं। उत्त
रतः प्रणीताप्रणयनं। ॐ को वः प्रणयतीति पूर्णां। दक्षिणं जान्वाच्य स्तरणं प्रादेशेन
रूपयित्वा। कुशेन छिनत्ति पवित्रे स्थः इति पवित्रच्छेदनं वैष्णव्यावित्य स्फरणं।

न्वेत्रान्त्यां त्रिः पर्युक्ष्य महीनां पयोसीत्याज्यस्थालीमादाय। इषे त्वा। इत्यधिश्रित्य। स्रु
चि प्रतपनं। प्रोक्षणं संमार्जनं पुनः प्रतपनं। स्रुच संमार्गः प्रतपनं प्रोक्षणं मेक्षण
स्य स्रुग्वत् कृत्वा। ॐ ऊर्जे त्वा। इत्युदगुद्वास्य स्रुवेणोदकं कृत्वोत्सवितुष्ट्वा प्रसव
उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः। इत्याज्यसंस्कारः। सवितुर्वः प्र
स॰ इत्युदकसंस्कारः॥ हविर्ग्रहणं। आदित्याय सोमायांगारकाय बुधाय बृहस्प
तये शुक्राय शनैश्चराय राहवे केतुभ्यो जुष्टं गृह्णामि॥ अ॥ चरुपंत्रि स्त्री॥ आदित्या ६
य॰ न्योजुष्टमासादयामि। आदित्याय॰ न्यस्त्वाजुष्टं प्रोक्षामि। पवित्राभ्यां स्रुवोदके
न प्रोक्षणं। समिदादिकं प्रोक्ष्य शेषोदकं प्रणीतासु मुक्त्वा त्रिः प्रक्षाल्य नमधिश्रयणं॥

ततो ग्रहादीनां स्थापनं। याज्ञवल्क्यः॥ सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः।
शुक्रः शनैश्चरो राहुः केतुश्चेते ग्रहाः स्मृताः। वृत्तमंडलमादित्याय। चतुरस्रं सो
माय त्रिकोणमंगारकाय बाणं बुधाय दीर्घचतुरस्रं बृहस्पतये पंचकोणं शु
क्राय। धनुः शनैश्चराय राहवे शूर्पाकृतो ध्वजा इति। ताम्रकात् स्फटिकाद्रक्त
चंदनात्स्वर्णकादुभौ। रजतादयसः सीसात्कांस्यात् कार्या ग्रहाः क्रमात्। स्ववर्णैर्वा
पटे लेख्या गंधैर्मंडलकेषु वा। वर्म्मस्क्तनास्करांगारकौ रक्तौ शुक्लौ शुक्रनिशा
करौ। पीतौ बुधगुरू श्वेव शेषाः कृष्णा ग्रहाः स्मृताः। यथावर्णं प्रदेयानि वासां
सि कुसुमानि च॥ ॥इति याज्ञवल्क्यः॥ ॥द्वादशांगुलमादित्यं सोमं च द्विगुणं लि

त्रेत्।। अंगारकं बुधं वापि लिखेद्वै चतुरंगुलं। षडंगुलं गुरुं चैव लिखेच्छुक्रं नवांगु
लं। चतुरंगुलकं सौरिं सोमाद्द्व्यंगुलाधिकं। लिखेद्राहुं ततः केतुं मध्य द्व्यंगु
लमेव तु। मध्ये तु भास्करं विंद्याच्छशिनं पूर्वदक्षिणे। दक्षिणे लोहितं विंद्याद्बुधं
पूर्वोत्तरेण तु। उत्तरेण गुरुं विंद्यात्पूर्वेणैव तु भार्गवं। पश्चिमेन शनिं विंद्याद्राहुं
दक्षिणपश्चिमे। पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतंदुलैः। शुक्रार्कौ प्राङ्मुखौ
ज्ञेयौ गुरुसौम्यावुदङ्मुखौ। प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतोमुखाः। अ ७
ग्निरापो धरा विष्णुरिंद्रेंद्राण्यौ प्रजापतिः। सार्पराज्ञी तथा ब्रह्मा ग्रहाणां देवताः
स्मृताः। ईश्वरोमि तथा स्कंदस्तथा नारायणः स्मृतः। ब्रह्मा शक्रो यमः कालश्चित्र

श्चेत्यधिदैवताः। अग्निर्दक्षिणतः सूर्याच्छंभुरुत्तरतो रवेः। आपस्तूत्तरतः सो
मादुमा दक्षिणतस्तथा। भूमिः पश्चिमतो भौमात्स्कंदो दक्षिणतः स्मृतः। वि
ष्णुः प्राच्यां बुधात्स्थाप्यः पश्चान्नारायणः स्मृतः। इंद्रः पश्चाद्गुरोश्चैव ब्रह्मा स्था
प्यो पपूर्वतः। इंद्राणी पश्चिमे शुक्रात्प्राच्यामिंद्रस्तथैव च। प्रजापतिर्नैर्ऋते तु श
नेराग्नेयतो यमः। सार्पराज्ञी नैर्ऋते तु राहोः कालो पराजिते। केतोराग्नेयतो
ब्रह्मा चित्रगुप्तस्तु नैर्ऋतौ। दिक्पालास्तु दशैवेत इंद्रोग्निर्यम निर्ऋती। वरुणः
पवनः सोम ईशो ब्रह्मा ह्यपि वापि। आद्या अष्टौ दिक्पालाः प्राच्यादिष्वीशान्यांता
सु दिक्षु प्रदक्षिणं प्रति दिशामेकैक इत्येव स्थाप्याः। नवम ईशानी प्राच्यो मध्ये द

याम्यस्तत्संमुखः। पश्चिमावायव्योर्मध्ये। इंद्रो ब्रह्मा यमो वायुर्वरुणश्चेति लोकपा
लाः। लोकपालास्सूर्यादुत्तरतः स्थाप्याः। शनेरीशान्यां केतोराग्नेय्यां सूर्यवायव्यां ग
णपतिः। गणपतेरुत्तरतो जातवेदाः। गणपतेः पूर्वतः क्षेत्रस्य पतिः। गणपतेर्नैर्ऋ
ते वास्तोष्पतिः। जातवेदस उत्तरतो मरुतः। ग्रहमंडलस्येशानकोणे मारस्य प्रदक्षि
णं कृत्तिकादिनक्षत्राणामभिजितासहाष्टाविंशतिसंख्याकानां प्रतिदिशं सप्त
सप्त देवताः स्थाप्याः। ततः आचार्यो ग्रहपीठादीशान्यामकालबुध्नं जलपूर्णं रुद्रक ८
लशं स्थापयेत्॥ तत्प्रकारः॥ ॐ स्योना पृथिवी० पः। इति पृथिव्यामभिमंत्रणं। आजिघ्रं०
र्वृषा। कलशाभिमंत्रणं। आपूर्णा० नृत्तु चः स्वः पूरणं। या ओषधीः०। ओषधीप्रक्षेपः। आ

युष्यं वर्च्च० मुद्रार्पणं। अश्वत्थे वो० इति पंच पल्लवाः। वटाम्रजंबूप्लक्षोदुंबराणां पं
चपल्लवाः। इदं ते पात्रं० परिधानपात्रं। याः फलिनी० नारिकेरपूगादिफलानि
पिधानपात्रोपरि। युवं वस्त्राणीति वाससा वेष्टनं। ततो रुद्रकलशोपरि ब्रह्मवि
ष्णुरुद्रस्थापनं। अक्षततंडुलैः। तत्र जापको रुद्रजपं करोति। ततो गृहादीनां प्रतिष्ठा
संक्षेपेण पूजा। तद्विधिर्वक्ष्यते। ग्रहादीनां स्थापनमुक्तमधुनानुस्थापन इव नाद्यर्थमं
त्रा उदाह्रियंते। अथ मंत्राः। आत्वाहृत्वेनापायस्वाग्निमूर्द्धा दिवि बुध्यध्वं बृहस्पतेऽत्र कं
तत्वन्यद्वमग्निरग्निभिः कयानश्चित्रः केतुं कृण्वन्निति ग्रहमंत्राः॥ अग्निं दूतमप्सु
मे स्योना पृथिवी इदं विष्णुरिंद्रं श्रेष्ठानीन्द्राणीमासु नारिषु प्रजापते न त्वदायं गौर्ब्रह्मज

दसानसिं ब्रह्मणस्पते परे यि वां सं वाय वायाइ वरुणः प्रा विते ति पंच लोकपाल मंत्राः ४

ज्ञानमिति देवतामंत्राः। कद्रुद्राय गौरीर्मिमाय यदक्रंदः सहस्रशीर्षा ब्रह्मणस्पते त्रा
तारमिंद्रं परेयिवांसं कायमानस्त्वं नश्चित्र ऊत्येत्यधिदेवतामंत्राः। त्रातारमिंद्रं त्व
न्नो अग्ने यस्मिन्वृक्षे प्रतर्यपुरुष त्तमं वरुणान्नो नियुद्भिः वयं सोम तमीशानमस्मे रु
द्रास्योना पृथिवीति दशदिक्पालमंत्राः। गणानां त्वा जातवेदसे क्षेत्रस्य पतिना वास्तो
ष्पते प्रतिमरुतो यस्य इंद्रियइति पंचगणपत्यादिमंत्राः। अग्निर्ऋषिः प्रजापते आ
प्यायस्व कद्रुद्राय अदितिर्द्यौर्बृहस्पतिः अतिदर्यः कालिको नामोदीरतां त्वं नो नो अग्नि
र्ऋजुनीति नः सविता पश्चातादिंद्र त्वष्टारं वायाहीन्द्राग्नी आगत मानो मित्रावरुण
त्रातारमिंद्रमपेहि मनसः समुद्रज्येष्ठा विश्वेदेवास आगत तत्सवितुर्वरेण्यमि ६

दं विष्णुर्येनः सपत्ना वरुणः प्राविता शन्नो अज एकपाद् तन्नो अहिर्बुध्न्यः पूषणा अन्वे
एषो उषाः परेयिवांसमित्यष्टाविंशति नक्षत्रदेवतामंत्राः। ब्रह्मणस्पत इदं विष्णुः क
द्रुद्रायेति ब्रह्मविष्णुरुद्रमंत्राः॥ ॥इति स्थापितदेवतामंत्राः॥ ॥ग्रहादेवाधिदेवौ
च दिक्पाला लोकपालकाः। गणपत्यादयः पंच नक्षत्राणां च देवताः॥ ब्रह्माविष्णुस्तथा
रुद्र इति स्थापितदेवताः॥ ॥ॐ नरुद्र जपस्यापि दशांश कृतयः पृथक्। अश्याम इति
त्वेव होतव्यो स्त्रयोदश। वेदादयस्त्र्यंबकश्च लक्ष्मीचाप सरस्वती। मरुत्पर्जन्ये वसव
विश्वेदेवाश्विनी सुतौ। सविता व्याहृति गण इत्यस्थापितदेवताः॥ ॥अश्याम तेसुम
तिं॥ इति रुद्रजपदशांश होममंत्राः अपस्थापितदेवतामंत्रा होमार्थमुच्यंते। अग्नि

॥ जेईषेत्वा अग्न आयाहि शन्नोदेवीरिति वेदादि। चिदादयस्त्र्यंबकं सक्तुमिव पावकानो
मरुतो वीळुपर्जन्याय येनः सपत्नाउमासम्म एषोउषास्तत्सवितुर्वरेण्यं त्वरादिमंत्रा
हतयस्त्वतस्व इति सप्तदश स्थापितदेवतामंत्रा होममात्रप्रयोजना॥ तदस्तुमित्रा
वरुणा॰ प्रतिष्ठामंत्र॥ इति यज्ञादिस्थापनमुक्तं तदर्थं तन्मंत्राश्चोक्तास्तत्प्रसंगादन्येप्युक्ताः
॥ इति मंत्राः॥ ॥ अथ क्रमप्राप्तासंक्षेपपूजा॥ ॥ आदित्यादिनवग्रहेभ्यः स्थापितदेवता
सहितेभ्यः इदमत्रचंदनादिपूजा॥ ॥ इति संक्षेपपूजा॥ ॥ आचमनं स्वस्त्ययनमारभ्या १०
धिश्रयणपर्यंता कुशंडिका प्राग्विहिता ततो ग्रहादीनां कलशस्य च स्थापनं संक्षेपपूज
नं च विहितमिदानीमुत्कर्मक्रमप्राप्ता अधिश्रयणादुत्तरा त्रितात्तिघारणाद्या कुशं

डिका विधीयते॥ ७॥ त्रितात्तिघारणं उदग्वासनं। पार्श्वप्रक्षालनं। प्रत्यत्तिघारणं च।
सप्तदश समिधेत्कुर्यात्। विष्णोई स्तोसि। इति कुशास्कवयोर्वामदक्षिणस्यां हस्ता
न्यां युगपद्ग्रहणं। त्वमग्ने हिरण्यरूपो ग्निर्जगती। ॐ त्वमग्ने प्रमति॰ म दास्यः स्वाहा। इति
वायव्यकोणमारभ्य विच्छिन्नं शराकारमाग्नेयकोणपर्यंतं जुहोति। ॐ यस्येमे हिरण्य
गर्भस्त्रिष्टुप्। यस्येमे हिमवं॰ विधेम स्वाहा। इति नैरृत्यकोणमारभ्य विच्छिन्नं शारवदव
क्रमीशानकोणपर्यंतं जुहोति। ॐ अग्नये स्वाहा। उत्तरतः। सोमाय स्वाहा दक्षिणतः।
मध्ये प्राकृतयः। इत्याज्यभागौ। ताकुशंडिका। ततो ग्रहादिसंबंधिसमिदाज्यहोमादि
कं। तद्यथा। आदित्यादिनवग्रहाणां आकृष्णेनेत्यादिकैः स्वस्वमंत्रैः स्वाहांतैरर्कादिस

न्होमःस्वाहाकारांतेहोममंत्राणांसमिदाधानमंत्राणांच॥ ॥अर्कःपलाशःखदिरोपामा
र्गःपिप्पलः।उदुंबरःशमीदूर्वाकुशाश्चसमिधःक्रमात्।अेकैकस्यत्वष्टशतमष्टाविंशति
रेववा।होतव्यामधुसर्पिर्भ्यांदध्नाक्षीरेणवाक्रताः॥इतियाज्ञवल्क्यः॥उक्तमंत्रैःप्रतिमंत्र
मेकेनस्रुवेणनवग्रहेभ्यआज्यहोमः।ततश्चरुहोमोवदानधर्मेणतथाहि।एकंघृतस्रुवं
स्रुचिमुक्त्वाअवदानद्वयंमेक्षणेनस्रुचिमुक्त्वापुनःस्रुवःअभिघारद्वयंचरोः।आकृ
ष्णेन०पशान्।स्वाहा।पूर्ववच्चरुहोमंकृत्वा ॐआप्यायस्व०पो।स्वाहा२ चरु०।अग्निर्मूर्धा० ११
ति०।स्वाहा।चरु०।उद्बुध्यस्वं०वः।स्वाहा।चरु०।कयानश्चित्र०ता।स्वाहा।।५ चरु०।केतुंकृ
ण्वन्न०पाः।स्वाहा॥९॥आकृष्णेनेत्यादिमंत्रैर्घृताक्ततिलयवहोमोयहदेवताधिदेवतादि

स्थापितदेवतास्योस्थापितास्यस्च।यंपात्राक्तिअष्टोत्तरसहस्रंवाशतमष्टोत्तरंवाशत
मष्टोत्तरंतथा।अष्टाविंशतिरष्टौवाएकैकस्यवाहोमयेत्।प्रथमोयुतहोमस्याद्वलक्षहोम
स्ततःपरः।तृतीयःकोटिहोमस्तुसर्वकामफलप्रदः।आधुनिकाअशक्तास्तेवंकुर्वंति।
तिलयवाहुति।२५।द्राक्षेक्षुपूगनारिंगजंबीरंबीजपूरकं।उत्तनीनालिकेरंचदा
डिमानियथाक्रमं।आकृष्णेनेत्यादिमंत्रैःप्रत्र्यचंफलाहुति।८।अग्निंदूतमित्यादिति
प्रत्येकंतिलयवाहुति।८।एंद्रमा०प्रत्येकं।८।गणानां०।८।जातवेदसे०।८।इत्यादि
प्रत्येक।८।जातवेदसइत्यनेनघृताक्तसर्षपहोमः।अग्निर्ऋषिः।०प्रतिमंत्र।८।तिल
यवाहुति।ब्रह्मणस्पति०।८।इदंविष्णु०।८।कद्रुद्राय०।८।रुद्रजपस्यदशांशहोमः।अ

यामनेत्युमतिंदेव॰हविः।स्वाहा।आकृति॥७॥ततोस्थापितदेवताहोमः।अग्निमीळेइ
षेत्वेत्यादिभिःप्रत्येकं॥८॥त्र्यंबकंसक्तुमिवेत्यादिभिर्व्याहृत्यंतैःप्रत्येकं।आकृति॥९॥त्र्यं
बकमित्यनेनघृताक्तगुग्गुलस्यहोमोनतिलयवानां।सक्तुमिवेतिपयोदूर्वाशर्कराश
तपत्रमिश्रान्शालितंडुलान्जुहुयात्।नतुतिलयवान्।पावकानइत्यादिभिस्तिल
यवानेवइत्यस्थापितदेवताहोमः॥ ॥इतिहोमःसमाप्तः॥ ॥ततोविस्तरेणर्यमानो
ग्रहपूजांकुर्यात्।तथाहि।अद्यत्र्यं॰देशेच।मुतस्यविवाहोत्सवप्रा॰र्थं।आदित्यादि॰प्री १२
त्यर्थं।आदित्यादिनवग्रहाणांसानुकूलार्थं।आदित्यादिनवग्रहाणांस्थापितदेवतास
हितानांपूजनमहंकरिष्ये।भास्करांगारकौरक्तौश्वेतौशुक्रनिशाकरौ।पीतौबुधगु

रुश्चैवशेषाःकृष्णाग्रहास्मृताः।यथावर्णप्रदातव्यंवासःपुष्पंविलेपनं।रक्तंश्वेते
क्रमाद्दद्यात्करवीरेकुसुंभकं।चंपकंशतपत्रंचजातीपुष्पंशमीतथा।पुष्पंचाग
स्त्यकंप्रोक्तंविचित्राणियथाक्रमं।याज्ञवल्क्यः।गुडोदनंपायसंचहविष्यंक्षीरषाष्टि
कं।दध्योदनंहविश्चूर्णमांसंचित्रान्नमेवच।रक्तचंदनमादित्यायश्रीखंडंसोमा
यरक्तचंदनंकुंकुमेवाअंगारकाय।गोरोचंदनकेसरंवाबुधबृहस्पतिभ्यां।श्री
खंडंशुक्राय।कस्तूरिकाशनिराहुभ्यां।विचित्रचंदनकेतुभ्यः।रक्तकरवीर
मादित्याय।श्वेतकरवीरंसोमायकुसुंभकमंगारकायचंपकंबुधायशतपत्रंबृह
स्पतयेजातिपुष्पंशुक्रायशमीपत्रंशनैश्चरायअगस्त्यपुष्पंराहवेविचित्रपुष्पंकेतुभ्यः।

कुंदरादिधूपः। उक्तधूपाभावे गुग्गुलः। नववर्त्तियुतो दीपः। गुडोदनमादित्याय। घृत
पायसं सोमाय। हविष्यान्नमंगारकाय। क्षीरषाष्टिकं बुधाय। दध्योदनं बृहस्पतये।
मोदकं शुक्राय। सघृतं चूर्णीभूतं माषान्नं शनैश्चराय। मांसमोदनसंयुक्तं राहवे।
चित्रोदनं केतुभ्यः। महार्णवे। चंदनानि। दिवाकरकुजाभ्यां हि दापयेद्रक्तचंदनं।
चंद्रे च भार्गवे चैव श्रीखंडं च प्रदापयेत्। कुंकुमेन तु संयुक्तं श्रीखंडं जीवसौम्ययोः।
अगरं चंदनं दद्याद्राहुकेत्वर्कजेषु च। आरवे कुंदरकं धूपं शशिनः सघृतान्वितः। नै १३
मिसध्वजरसं चैव अगुरं च बुधे तथा। सिह्लकं गुरवे दद्याच्छुक्रे विश्वागुरुं तथा। गुग्गुलं
मंदचारे तु लाक्षां राहौ च केतवे। पूर्वोक्तकुंदरकादिधूपाभावे सर्वेषां गुग्गुलं रवे

धूपः। तथा च याज्ञवल्क्यः॥ ॥धूपो देयश्च गुग्गुलुरिति। ततो दीपं दत्वा नैवेद्यं दे
यं। महार्णवे। गुडोदनं रवे दद्यात् सोमाय घृतपायसं। लोहिताय हविष्यान्नं बुधा
य क्षीरषष्टिकं। दध्योदनं गुरोर्दद्यात् शुक्राय घृतमोदकं। मिश्रं घृतमाषैर्नैवे
द्यं स्याच्छनैश्चरे। राहोर्मांसोदनं दद्यात् केतोश्चित्रोदनं तथा॥ ॥अथ पूजाविधिः॥
यजमान आचमनं प्राणायामं कृत्वा। अद्येत्यादि देशे च। सुतस्य विवाहोत्सव॰ सिद्ध्य
र्थं च आदित्यादिनवग्रहेभ्यः स्थापितदेवताभ्य इति तेभ्यः पूजनमहं करिष्ये। आदित्या
दिकेतुपर्यंतेभ्यः। अग्न्यादिग्रहदेवताभ्यः इदमत्र। इंद्रादिदिक्पालेभ्यः इदमत्र।
इंद्रादिलोकपालेभ्यः इदमत्र। गणेशादिपंचभ्यः इ॰। अग्न्यादिनिर्ऋतिदेवताभ्यः इ॰।

रुद्रक्तं तोपरि ब्रह्मविष्णुरुद्रेभ्यः ॥ र॰ आदित्याय इदं चंदनं । इत्यादि पूर्ववत्पः स्वस्वमं
त्रैः पूजा । धूपः । दीपः । अर्घः । तस्य मंत्रः । आदित्याद्याः ग्रहाः सर्वे पीठे येत्र प्रतिष्ठिताः ।
ते गृह्णंतु मया दत्तमिममर्घं नमो नमः । नाम्त्रादि फलादि दद्यात् । नागवल्लीदलं युक्तं
पूगीफलसमन्वितं । कर्पूरेण समायुक्तं तांबूलं प्रतिगृह्यतां । नैवेद्यं । अत्र॰ नैवेद्या
नियपात्नतानि आदित्यादि नवग्रहेभ्यः स्थापित देवताभ्य इति त्योवः स्वाहा । आ
रात्रिकं । नमो ब्रह्मणे एकरूपाय देवासो विश्वतश्चक्षु नमो महद्भ्यः । इदमारात्रि १५
कं आदि॰ वः स्वाहा । अत्र पुनः पुष्पपूजा । आरात्रिकं वंदनं नमस्कारः । आदित्या॰ नो
नमः । प्रार्थना । आयुर्विद्यां धनं दत्त्वं यशः सौर्यं च पुष्कलं । पुत्रान्दत्त सुखं दत्त सर्वान्का

मां श्च दत्त मे पूजासंकल्पः । रक्तचंदनादि चंदनैः रक्तकणवीरादि पुष्पैः कुंदरादि
धूपैः । नाम्त्रादि फलैः गुडोदनादि नैवेद्यैः कर्पूरारात्रिकैः अनया यथा पात्नत पूजया
भगवंत आदित्यादि॰ ग्रहाः स्थापित॰ सहिताः प्रीयंतां । जलं जले । वह्निपूजा । आदि
त्ये कपिलं नाम पिंगलः सोमउच्यते । धूमकेतुस्तथा नौम जठराग्निर्बुधे स्मृतः । गुरो
चैव शिखिनाम शुक्रे नवतिहाटकः । शनैश्चरे महातेजा राहौ केतौ कृताशनः । इति वि
ह्नौ पुष्पप्रक्षेपः । बलिदानं । होमकुंडं परितः । पूर्वादि दशादिक्षु क्रमेण । त्रातारमिंद्र
मवि॰ ह्नः । इंद्राय नमः । इंद्रानुचरेभ्यो नमः । इति पूर्वस्यां । त्वन्नो अग्ने॰ ते । अग्नये न
मः । अग्न्यानुचरेभ्यो नमः । एवं क्रमेण । यस्मिन्वृक्षे॰ यमाय नमः । यमानुचरे॰ । प्रात

युधिः॰नां।निर्ऋतिनमः।निर्ऋत्यनुचरे॰।उदुत्तमं॰मा।वरुणायनमः।वरुणानुचरे॰।
आनोनियुद्भिःशत॰नः।वायवेनमः।वायव्यनुचरे॰।वयंसोमव्रत॰इ।सोमायनमः।सो
मानुचरे॰।तमीशानंवस्वो॰।ईशानायनमः।ईशानानु॰।अस्मेरुद्रा॰।रुद्रायनमः।रुद्रा
नुचरे॰।इतीशानीप्राच्योर्मध्ये।स्योनापृथिवी॰।पृथिव्यैनमः।पृथिव्यनुचरेस्योनमः।
इतिवायव्यपश्चिमयोर्मध्ये।पूर्वकृतिः।घृतस्यस्रुवचतुष्टयंस्रुचिमुक्तापत्रंपू
गंनालिकेरंश्रीखंडंकर्पूरंउत्तमपट्टवस्त्रं।चमुक्काततःस्रुवंपूर्णंकृत्वायजमानो १५
न्वारब्धेसमुद्रादूर्मिरितिसूक्तेनमधुमंतंतत्कर्मिमित्यंतेनअवच्छिन्नधारयाघृतंजु
हुयात्।।पूर्वं।।आज्यभागांताकर्शांडिकाप्रारभ्यते।स्विष्टकृत्।एकःस्रुवःएकश्चवदानं।

उपरिस्रुवद्वयं।नाभिघारः।ॐअग्नयेस्विष्टकृतेस्वाहा।उदकोपस्पर्शनं।म
हतकं।भूःस्वाहा।ॐभुवःस्वाहा।ॐस्वःस्वाहा।ॐभूर्भुवःस्वःस्वाहा।२।अयाश्चाग्नेस्य
नभिशस्तिश्चसत्यमित्वमयाअसि।अयासामनसाकृतोयासंहव्यमूहिषेअ
यानःकृणुहिभेषजंस्वाहा।प्रजापतयेस्वाहा।सव्येपाणौयेकुशास्तान्दक्षिणे
नायेसंगृह्यमूलेसव्येनस्रुचग्रंमध्यंस्रुवेमूलमाज्यस्थाल्यां।अग्नेर्वासोसि।
इतिजुहुयात्।तिस्रःसमिधोजुहुयात्।पवित्राभ्यांपर्युक्षणं।इदमापइति
ऋचेनमार्जनं।पवित्रेअग्नौप्रक्षिप्य।बर्हिर्होमः।ततोहोमसंकल्पः।पुण्याहंदीर्घमा
नरस्तु।शिवा॰।सो॰।अच्छिन्नं॰।दीर्घ॰।वृद्धि॰।धन॰।इष्ट॰।अनि॰।यत्पा॰।द्विप॰।अ

स्मिन्ग्रहशांतिकर्मणि यद्यद्द्रव्यं यावद्यावत्संख्याकं येन येन मंत्रेण कृतं तस्यै तस्यै दे
वतायै तत्तद्द्रव्यं तावत्तावत्संख्याकं तेन तेन मंत्रेण कृतं तस्यै तस्यै देवतायै। इति ग्र
हं जुहोमि। करसंपुटं कृत्वा। सा सा देवता सुप्रीता शांतिदा पुष्टिदा वरदा च भवतु॥ ॥
दक्षिणासंकल्पः॥ ॥अस्य ग्रहशांतिकर्मणः प्रतिष्ठासिद्ध्यर्थं सर्वारिष्टपरिहारार्थं
सर्वकामसमृद्ध्यर्थं॰ आदित्यादिनवग्र॰ धेन्वाद्युक्तदक्षिणानिःक्रये यथा परिक
ल्पितं द्रव्यं आचार्यप्रमुखऋत्विक्जापकेभ्यो इं संप्रददे। यो यस्य विभागः स प्रतिगृ १९
ह्यतां। धेनुः शंखवस्त्रपान् अनड्वान् इमं वा सोइयः क्रमात्। कृष्णागौराय संछागएता
वै दक्षिणाः स्मृताः। भूयसी संकल्पः। अस्य ग्रहशांतिकर्मणः॰ न्यूनातिरिक्तं परिह

णार्थं यथोत्साहं भूयसीं दक्षिणां नानागोत्रेभ्यो ब्रा॰ दे। ॐ दक्षिणाः पांतु। ब॰। दी॰।
य॰। ति॰। आ॰। प्र॰। स्था॰। ब॰। ज॰। अ॰। पुण्या॰। पुण्या ई॰ ३ ऋ॰ ३ क॰ ३ स्व॰ ३। ॐ स्व
स्ति॥ अस्य नवग्रहशांतिकर्मणो यन्न्यूनातिरिक्तं॰ स्त॰। गृहे॰ उत्तरे॰॥ ॥अ
भिषेकः॥ स्वजनैः सह पूर्वाभिमुखे यजमाने दृष्ट्वानुक्रमेणोपविष्टे रुद्रक
लशात्ताम्रपात्रे जलमुद्धृत्य तेषां शिरःसु कर्त्तव्यः॥ ॥तत्र मंत्राः॥ ॥ॐ अंबयो
यंति स्त कः। आपः इषाः कः। इमं मे गंगे स्त कः। समुद्रज्येष्ठाः कः ४ सहस्रा
क्षं शतधारं मृषिभिः पावनं कृतं। तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते॥ १॥
भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः। भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः॥ २

पत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि। ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु ते सदा।३
अमृताभिषेकोऽस्तु। मांगल्यं कुंकुमेन साक्षतेन। ग्रहाणां आशिषो दत्वा दि
फलानि दृष्टानुक्रमेण तेषां हस्ते र्पयेत्। आज्योक्तस्रुवेण होमविभूतिं गृहीत्वा
तेषां हस्ते कुंकुमेनैव मांगल्यं विभूत्या कार्यं॥ प्रथमं ग्रहादीनां वर्द्धापनं पश्चात्तेषां।
आशिर्वादः। तेभ्य आचमनं देयं। पूर्वं बर्हिर्होमांता कुशंडिका। उत्तरा होमसंकल्पा
द्यवांतरं चक्षतं। इदानीं प्रणीता मिमोकादिका समाप्ति पर्यंता कुशंडिका प्रार १७
भ्यते। प्रणीता विमोकः। ब्रह्मणे पूर्णपात्रं। ग्रहशांतिकर्मणः समृद्ध्यर्थं इदं पूर्ण
पात्रं स हिरण्यं ब्रह्मन् तुभ्यमहं संप्रददे। ब्रह्मोत्सर्जनं। कर्मापवर्गे ब्राह्मण

भोजनं। अस्य नवग्रहशांतिकर्मणः समृद्ध्यर्थं न्यूनातिरिक्तं परिपूर्णार्थं कर्मांगदेव
तानां प्रीत्यर्थं। यथासंपन्नेनान्नेन तृप्तिपर्यंतं भोजनेन ब्राह्मणमेकमहं
तर्पयिष्ये। भगवत्यः कर्मांगदेवताः प्रीयंतां। शंन्नः पंचोनाशांतिः। शान्नइंद्राग्नी
वर्ग ३ त्रयो वै यज्ञे इति जपेत्। अस्य नवग्रहशांतिकर्मणो यन्न्यूनाति० स्तु। गृहे
द्गृह उत्तार कर्म०। चतुर्भिश्च रक्षाभ्यां० नमः। यस्य स्मृत्या च० श्रीयज्ञपुरुषायन
मः॥ ॥इति कुशंडिका समाप्ता॥ ॥ततो ग्रहादीनां विसर्जना॥ उत्तिष्ठ ब्रह्म
णस्पते इति ऋचा विसर्जनं॥ ॥ग्रहशांतिः समाप्ता॥ ॥श्री॥ ॥ब॥ ॥
अथ विनायकशांतिः॥ ॥ग्रहसहिता। ॐ उलक्षणं। रवातश्च अंगुल ५ यव०॥ ॐ ह्रीं॥

तृतीया अंगुल २ यव ०॥ ३ चैत्रैः। चतुर्पंशोनः। मेखलात्रयमा अंगुल ६ पृथु द्वितीयां अंगुल ४
यव १ पृथुत्वं ३ चेः। द्वितीया अंगुल ३ यव ०॥ ३ चैः॥ तृतीया अंगुल २ यव ०॥ ३ चैः। अंगुल १२
दीर्घयोनिः। मध्ये अष्टांगुल पृथुः। अंगुल ३ कुंड मध्यखात प्रविष्टा। अंगुल १ मात्रः कंठः।
कुंडे ज्येष्ठायस्य एवंकार खात अंगुल १ पयव ३॥। मेखलात्रयमांगुल ४ यवौ मे द्वि० अंगु
ल ३ यव ३ तृ० अंगुल २ यव०॥ नद्रासनं अंगुल ३ चतुरस्त्र अंगुल १२ ज्येष्ठायः। गणे
शांबिकयोः पीठे अंगुल १२ समचतुरस्त्र। ३ ज्येष्ठायोपि अंगुल १२ अष्टपीठं तद्रासनं समा
नमेव। होमकुंडा उत्तरस्यां दिशि नद्रासनं। ईशान्यां अष्टपीठं। पूर्वस्यां दिशि गणेशांबि २८
कयोः पीठे। तत्रापि दक्षिणे पीठे गणेशमूर्त्तिस्थापनं। उत्तरस्मिन् अंबिकामूर्त्तिस्थाप

नं॥ ॥अथ उपचारः॥ ॥गणेशांबिकयोर्द्देममूर्त्ती सोवर्ण्यौ। कापडौं ४ रक्तं चापीतं श्वेतं
अरुत वस्त्रं १ अरुस्थापनार्थं मंजुलीयां रुद्रकलशार्थं कुंभ ४ अकाल बुध्न कलश १
श्रीफल ५ मुंग ५ पन ५ जुलीया ४ कुंभार्थं पंचपल्लव। सुगंधिद्रव्य। प्रियंगु। नागकेसर। वा
लु। अगरु। गोरोचन। यक्षकर्द्दम। कर्पूरागरु कस्तूरी कंकोलैर्यक्षकर्द्दमः। चंदनं। पं
चमृत्तिका। तीर्थोदक। सूर्पश्चूर्पोपि द्वार। करंडपवाल्हुं १ खांड्या चोषा पवाल्हं १ फलमु
ष्टि १ कूरशेर १॥ गोधूमचूर्णनिर्मित मत्स्य पक्वापक्व ८ काचां ६ पाकां ६ मांसस्थाने मा
षां त्र सेर १॥ नानाविधं पुष्पं। नानाविध गंधा। सुरा त्रिविधा। गोडी पैष्टी माध्वी चा। मूल
प्रकृपत्री ३ पूरी ३ पूप ६ ईडरां ६ करंबोन्नोर १ पायसन्नोर १ त्रिलोटा ३ मोदक ३ रक्तानुदु

हचर्म १ श्रीपर्णीपीठ १ पंचवर्णस्वस्तिककरणं श्वेतचोषारातारोषा । अउद । नीलामु
ग । पालीदालि । वस्त्र २ यजमानार्थवस्त्रयुग्मं दक्षिणार्थं । सर्षपतैलशेर १ ॥ — — स्क
व । चरुस्थाली २ नालिकेर १० तिल । यव । अल्पतर । गुलशेर १ ॥ चोषामांणं ४ क्रांदेलु ०
अर्कपलाश । दूर्वादधिमधुदुग्धसाकर । नवयरु पात्री ॥ नवयरु नेधूप । कुंकुमसर्ष
प । रवीची ॥ पूजा । नामी ॥ पत्रदोवंत्री । गौरसर्षप । कल्कसाज्य । घरा ॥ सूकेडसुगंधद्रव्य
सहित । पूगपत्र । इतिउपहार ॥ ॥ स्थंडिलं विघ्नराजस्य गौर्याश्च स्थापनं ततः । व १९
रणं ब्राह्मणानां च ततोन्नासनक्रिया । स्थापनं कलशानां च तेषु मुद्रापनादिकं ।
कुशंडी चरुपाकां तालघुपूजाद्वयोरपि । अग्निनान्निघारणा घाज्यनागांनाच कुशंडि

का । नन्नासनोपविष्टस्य कल्केनोद्वर्तनं ततः । गंधैर्मूर्द्धि विलेपश्च दक्षिणास्व
स्तिवाचनं । कलशैः स्नपनं तस्य तिलहोमश्च मस्तके । यजमानेच्छया १० स्नानं चरी
राकृतयश्च षट् । विनायकांबिकापूजा प्रणामोर्घस्तथांजलिः । संकल्पश्चैव पूजा
यास्तुपस्थानं पृथक् पृथक् । कुशंडी स्विष्टकृत्पूर्वायावद्ब्रह्मविसर्जनात् । होमस्य
दक्षिणादीनां कल्पना मंगलक्रिया । बलिदानं चरोः शेषाच्चत्वरे सूर्पमोचनं । नत्नो
चरणं ॥ ॥ आचार्य १ स्वस्तिवाचक ४ यज्ञाणं ६ जापक १ यजमानउदङ्मुखः पूर्वा
न्मुखानां ब्राह्मणानां वरणं कुर्यात् । तत्र अद्येत्यादि विनायकोपसर्गनिवृत्यर्थं स
पुह विनायकशांतिकर्मणि ऋग्वेदमूर्त्तये आचार्याय एतत्तेपाद्यं । इत्यादि । स्वस्ति

वाचक एतत्ते पाद्यं। ऋत्विक्। एतत्ते पाद्यं। ज्ञापक ए॰ ततः ॐ अद्येव वरणमाहं। आ
चमनादि प्रयोगं पठित्वा। आचार्यप्रमुखस्वस्तिवाचकऋत्विग्ज्ञापकानां वरण
महं करिष्ये। अमुकसगोत्र अमुका अमुकशर्मन् वस्त्रयुग्मधेन्वाद्युक्त॰ स्वा
ज्ञापाकद्वयेनाहं यन्त्ये। नत्वा मामाचार्यं वृणे। वृतोस्मीत्याचार्यः कथयति। युष्मा
न् ऋत्विग्ज्ञापकान् वृणे। वृतास्म इति ते। इत्यादि यथा दत्तं॰ आचार्यप्रमुखऋत्वि
ग्ज्ञापकेभ्योऽहं संप्रददे। जं ज ले। यो यस्य॰ तां। इत्याद्युत्तरकर्मण्य विघ्नमस्तु। २०
इत्यंतं। सर्वत्र स्वस्तिवाचकशाखोधिकः। मांगल्यं ऋग्यादी वदाम्। अस्य यागस्य॰
कर्तव्यं कर्मैतद्विधिपूर्वकं॥ ॥ततो नमस्मने। ततद्वितरकर्त्तव्यानी जपीता

रव्य पंचवर्णस्वस्तिके प्राग्रीवमुत्तरलोमं रक्तमनडुहं चर्म आस्तीर्य तदुपरि श्री
पर्णी पीठं सवस्त्रं स्थापयेत्। पूर्वादि दिक्षु क्रमेण चतुरः कलशान् जलपूर्णा
नुक्तलक्षणान् स्थापयेत्। तेषु मुख्य पनादिकं न्यसेत्। अश्वस्थानाद्गजस्था
नाद्वल्मीकात् संगमात् ह्रदात्। मृत्तिकां रोचनां गंधान् गुग्गुलं च प्रियंवालुनाग॰ के
रमित्यादि कलशेषु निःक्षिपेत्॥ ॥ततआचमनं स्वस्त्ययनमित्यादि सर्वं
इत्यंतं कृत्वा हविर्ग्रहणं। मितायसंमितायशालाय कटंकटाय कूष्मांडाय रा
जपुत्राय जुष्टं गृह्णामि। ३ चतुर्पंच हस्लीं। जुष्टमासादयामि। आदित्याय॰ केतु
भ्यो जुष्टं गृह्णामि। चतु॰ जुष्टमासादयामि। मितायसं॰ राजपुत्राय त्वाजुष्टं प्रो

ह्वामि। आदित्याय॰ केभ्यस्त्वा जुष्टं प्रोक्षामि। त्रिः प्रक्षालनं तन्नयनं। अधिश्र
यणं च क्रमेणोदक संस्थं। दक्षिणतो गणेश पीठे वस्त्रमास्तीर्य तदुपरि अष्टदले
नागवल्लीदलोपरि गणेशमूर्तिस्थापनं। एवमंबिकायाः षट्कोणोपरि तयोः संक्षे
पपूजा। ततो ग्रहादीनां स्थापनं। रुद्रकलशस्थापनं। तत्र ब्रह्मविष्णुरुद्रस्थापनं।
सर्वेषां प्रतिष्ठा संक्षेप पूजा। रुद्रकलशे रुद्रजपः। अग्निनाग्निधारणाघाज्यभागांतं
कृत्वा यजमानस्य ललाटे कुंकुमचिह्नं कृत्वा वस्त्रार्पणं। तदासने आदौ दक्षिणपा २१
दं निधाय यजमानं उपविशति। ब्राह्मणेषु पुण्याहमिति ब्रुवाणेषु। ततः आचार्यः
साज्येन गौरसर्षपकल्केनाक्षाभ्यामंगुष्ठाभ्यां पादयोर्जान्वोर्जानुस्थितयोः कर

योः स्कंधयोर्ललाटेत्यनक्ति चतुष्टं कृत्वा। ततश्चतस्त्रः सुवासिन्योष्टौ वारमेवार्न्यं
जंति। ताभ्यो वस्त्रयुग्मानि मुक्तदानं स्वजन्म दद्यात्। ततः कल्केनोद्वर्तनं। गंधैर्म्
र्द्धि विलेपश्च। मांगल्यकरणं वर्द्धापनं। स्वस्तिवाचनं। पुण्याहं दीर्घमायुरित्या
दिस्वस्तिवाचकहस्तेषु॰ सुशांतिर्नवत्वित्येवं कृत्वा। अस्य तदासनोपविष्ट
स्य मम स्वस्तिवाचनकर्मणः प्रतिष्ठासिध्यर्थं श्रीगणेशप्रीत्यर्थं विनायकोपस
र्गनिवृत्यर्थं हिरण्य॰ द्रव्यं अपवाबाईस्पत्यानि वस्त्रयुग्मानि स्वस्तिवाचकब्रा
ह्मणेभ्यो इंसंप्रददे। जलं जग्ने। योयस्य॰तां। इत्सो। तथा तदासन॰स्य मम मन्त्री श्रं
म बिका प्रीत्यर्थं दत्तानि बाईस्पत्यानि विचित्राणि वस्त्रयुग्मानि मुक्तदस्त्र कस्त इता

निचतस्रस्त्यः सुवासिनीभ्यो इं संप्रदद्दे। ॐ दक्षिणाः पांत्वित्यादि स्वस्ति नवं तो
ब्रुवंतु। इति ब्राह्मणा इस्तेषु। अस्यनन्नासनोस्योपविष्टस्य मम स्वस्तिवाचन कर्मणो
यन्न्यूनाण्स्का। गृहे एतत्तत्। ततः पूर्वकलशमादाय सहस्राक्षं शतधारमृषिभिः पा
वनं कृतं। तेन त्वामभिषिंचंतु पावमान्यः पुनंतु ते। इत्युक्त्वा आम्रपत्रेण द्विरभिषि
च्य यजमान शिरसि पूर्वाभिमुखस्तिष्ठन् उत्तराभिमुखो वा आचार्यो निनयेत्। ततो
दक्षिण कलशमादाय भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः। भगमिंद्रश्च वायुश्च भ २२
गं सप्तर्षयो ददुरिति पूर्ववन्निनयेत्। पश्चिम कलशमादाय यत्ते केशेषु दौर्भाग्यं सी
मंते यच्च मूर्द्धनि। ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु ते सदा। इत्येवं निनयेत्। ततो वा

रुत्तरकलशमादाय। सहस्राक्षे भगं ते यत्ते केशेषु चेमंत्रानुच्चार्य पूर्ववन्नि
नयेत्। ततो वामहस्ते कुशानादाय तस्य शिरसि धारयन् सार्षपं तैलं उडुंबरस्रु
ण कुशाग्रां तद्दिते शिरसि वक्ष्यमाण मंत्रैर्जुहुयात्। यजमानस्यांगं कुर्यात्।
इदं मिताय न मम इत्येवं सर्वत्र। ॐ मिताय स्वाहा। ॐ संमिताय स्वाहा। ॐ शा
लाय स्वाहा। ॐ कटंकटाय स्वाहा। ॐ कूष्मांडाय स्वाहा। ॐ राजपुत्राय स्वाहा। ८
यजमानस्यात्यंगं स्वाहा। ततश्च उर्ग्रही तं भृत्वा मिताय स्वाहेत्यादिभिः षड्भि
र्मंत्रैः षड्विनायकाच वर्ककृतीर्जुहुयात्। ततो ग्रहाणां समिदाज्य चर्वादि हो
मः। ततो विनायकांबिका पूजा। ततः प्रकारः। ॐ तत्पुरुषाय विद्महे वक्रतुंडा

यधीमहि। तन्नो दंती प्रचोदयात्। इति मंत्रेण गणेशं षोडशोपचार पूजा। स्नानात्स्नानांतं
कृत्वा धूपदीप युक्तं सूर्पस्थं नैवेद्यं। सक्तु मोदकेन अर्घः। नारिकेरार्घश्च। त
त्पुरुषाय ॰ दंतिने एष ते दूर्वासर्षप पुष्पांजलिः। पुण्याहं दी॰ सुशांतिर्न्नविघ्नं। अस्य
गणेश पूजनकर्मणः समृध्यर्थं श्री विनायकप्रीत्यर्थं विनायकोपसर्गनिवृत्यर्थं
यथासंपन्नेनान्नेन ब्राह्मणान् इं तर्पयिष्ये। भगवान् श्री विनायकः प्रीयतां। अत्रा
कोयपा संख्याकान्वा। यथोक्तेनां पूजां श्री गणेशाय ते स्वाहा। अनया यथोक्तपू
जया भगवान् श्री गणेशः प्रीयतां। उपस्थापनं। रूपं देहि जयं देहि भगं भगव
न्देहि मे। पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे। एवमंबिकापूजा। सुभग ２३

ये विद्महे काममालिन्यै धीमहि। तन्नो गौरी प्रचोदयात्। इति मंत्रः। भगवति
देहि मे इत्युपस्थापने विशेषः। ततो ग्रह पूजा यथोक्ता वह्नि पूजा पूजा पूर्णा
हुतिः। उत्तानाभ्यां करूभ्यामवदानमुद्धृत्य पात्रांतरे सुत्का। ततः स्कचिन्यस्य
पूर्वोक्तधर्मेण स्विष्टकृतेन जुहुयात्। सप्त कं। प्रजापतये स्वाहेति हुत्वा सर्वप्रा
णो येन कृत्वा ॰ स्फचयं ॰ अग्नेर्वामोसि तिस्त्रः समि॰ इत्यादि बर्हिर्होमः। पुण्याहं
दीर्घ॰ सुशांतिर्न्नविघ्नं। अस्मिन्स्व गृह विनायकशांतिकर्मणि यद्यद् द्रव्यं॰ उत्सृज्य
इ विनायकशांतिकर्मप्रतिष्ठासिध्यर्थं वस्त्रयुग्म धेन्वा घक्तद द्विणा निष्क्रये
यथा दास्यमानं द्रव्यं आचार्यप्रमुखेभ्यः ऋत्विग्भ्यः केन्यो इं संप्रददे। जलं।

ते।योयस्य॰तां हस्ते।नूयसीसंकल्पः।दक्षिणाःपांत्वित्यादिकं च।अस्यसयइवि॰
कर्मणीयमन्यू॰स्क्त।विनायकोपसर्गनिवृत्तिरस्क्त।ततोभिषेकोमांगल्यंच।विना
यकचरोःशेषान्नेनासनंपरितःबलिदानं।इंद्रायनमः।इंद्रानुचरेभ्योनमः।
इत्यादिक्रमासानुचरेभ्योदशदिक्पालेभ्यः ततश्चत्वरे सूर्पमोचनं।चत्वारेभूमिं
शोधयित्वाक्रंक्रमेणप्रोक्ष्यकुशानास्तीर्यचत्वराधिष्ठात्रीणां देवतानां अत्र चंद
नादिपूजा।ततःसूर्पस्थंबलिंदद्यात्।तस्यमंत्राः।बलिंगृह्णंत्विमेदेवाआदित्यावस २४
वस्तथा।मरुतोथाश्विनौरुद्राःसुपर्णाःपन्नगाःग्रहाः।असुरायातुधानाश्चपिशाचामा
तरोनगाः।शाकिन्योयक्षवेतालायोगिन्यःपूतनाःशिवाः।जृंभकाःसिद्धगंधर्वामाला

विद्याधरानगाः।दिक्पालालोकपालाश्चयेचविघ्नविनायकाः।जगतांशांतिक
र्तारोब्रह्माद्याश्चमहर्षयः।माविघ्नोमाचमेपापंमासंतुपरिपंथिनः।सौम्याभवंतु
तृप्ताश्चभूतप्रेताःसुखावहाः।इदंवैणवसूर्यस्थंनैवेद्यंततात्द्वपशरम्यांतंआ
दित्यादिलिंगोक्तदेवताभ्यइतिपूर्वाभिमुखःसन्पूर्वकोणेसूर्पंमुक्त्वाअविसृ
जन्दक्षिणातिक्रम्यनमस्कृत्यगच्छेत्।ततोमंडपद्वार्यागतयुगमुन्नालादिना
स्त्रियोमंगलाचारंकुर्वंति।केचिद्दिनशेकंमांगल्यंचचत्वरेसूर्पमुक्त्वागृह
मागतस्यपश्चाद्देवकुर्यान्निपूर्वमित्याहुः।पाठक्रमादर्थक्रमोबलीयानिति
ध्यायात्।ततःआचार्यःप्रणीताविमोकादिशांत्यंतंकुर्यात्।अस्यसत्रइवि

।ायकशांतिकर्मणोयन्न्यूनातिरस्तु।गृह्णंतुरस्तु।विनायकोपसर्गनिवृत्तिरस्तु
॥इतिविनायकशांतिःसमाप्ता॥ ॥विवाहादिशुभकर्मादौविनायकशांतिःग्रह
शांतिः॥तत्रतिथिनियमोब्राह्मणभोजनंवा।स्नानंसंध्यातर्पणंवैश्वदेवः।सर्वसिद्धयेन।
देवपूजा।निर्विघ्नगणेशपूजा।वर्णकाचारः।मातृस्थापनं।सवसोर्धाराः।वृद्धिश्राद्धं।
तेषांप्रकारः।गौरीपद्माशचीमेधासावित्रीविजयाजया।देवसेनास्वधास्वाहामा
तरोलोकमातरः।धृतिःपुष्टिस्तथातुष्टिरात्मदेवतयासह।गणेशेनाधिका २५
ह्येतावृद्धौपूज्याश्चषोडश॥२॥ऋग्वेदीनांसप्तदश।आचमनंप्राणायामः॥ए॥
स्वस्त्ययनपाठः।प्रयोगः।अद्येत्यादिदेशेच।अमुकस्यविवाहोत्सवकर्मप्र

रंतन्निमित्तंसर्वानिष्टपरिहारार्थंसर्वकामसमृद्ध्यर्थंसर्वदुरितोपशांत्यर्थंअ
विघ्नेनकर्मणांसिद्ध्यर्थंविनायकोपसर्गनिवृत्त्यर्थंचगणेशांबिकयोःप्रीत्यर्थंआ
दित्यादिनवग्रहाणांप्रीत्यर्थंआदित्यादिनवग्रहाणांसानुकूलार्थंब्राह्म
णभोजनसंकल्पपूर्वकंगणेशगौर्यादिमातॄणांचवसोर्धारासहितानांस्थापनप्रतिष्ठा
पूजनंचाहंकरिष्ये।पुण्याहंदीर्घमायुरस्तु।शिवाआपःसंतु।सौमनस्यमस्तु।
अक्षतंचारिष्टंचास्तु।इतिपात्रमध्ये।ततोयजमानशिरसिदीर्घमायुरस्तु।
शांतिरस्तु।पुष्टिरस्तु।वृद्धिरस्तु।धनधान्यसमृद्धिरस्तु।इष्टसंपदस्तु।अनि
ष्टनिरसनमस्तु।यत्पापंरोगोदुरितममंगलंतद्दूरेप्रतिहतमस्तु।द्विपदंचतु

अदेव्यः सुशांतिस्त्वित्त। इत्थं तं कृत्वा। अमुकस्य विवाहोत्सव कर्मणि यथासंपन्ने
नान्नेन तृप्तिपर्यंतं भोजनेन प्रत्येकमेकैकसंख्यया एकादश ब्राह्मणानहं त
र्पयिष्ये। भगवत्यो गणेशांबिके तथा आदित्यादिनवग्रहाश्च प्रीयंतां। ततो मातृस्थाप
नं। उत्तरत उपचार इत्येवं प्रदक्षिणं वा। ॐ श्रीमहागणपतिं स्थापयामि। ॐ गौरीं स्था०।
ॐ पद्मां स्थाप०। ॐ शचीं स्था०। ॐ मेधां स्था०। ॐ सावित्रीं स्था०। ॐ विजयां स्था०। ॐ ज
यां स्था०। ॐ देवसेनां०। ॐ स्वधां०। ॐ स्वाहां०। ॐ मातृः०। ॐ लोकमातृः स्थापयामि। ॐ धृ २६
तिं०। ॐ पुष्टिं०। ॐ तुष्टिं०। ॐ गोत्रदेवीं स्था०। प्रतिष्ठा। ॐ तदस्तु मित्रावरुणा तच्ची पूज्या।
गुडधूपः। नालिकेरार्घं। पूगपत्राणि। नैवेद्यं। इदं नैवेद्यं गणेशगौर्यादिमातरो वः स्वा

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथेंद्राणी चामुंडा सप्त मातरः॥ इति वसोर्धाराः॥
ब्राह्म्यादि सप्तमातृभ्यो नमः॥ इदमत्र चंदनादिस्ना।

हा। गणेशगौर्यादिमातृभ्यो नमस्कारः। ततो वसोर्धारा। पूर्वकुड्ये वा शतधारं वा
युमकर्ममंत्रेण सप्त घृतधारा मंत्राहृत्या कुर्यात्। प्राक्संस्था उदक्संस्था वा। शिर
सि संमेलिताः। प्रतिष्ठा। पूजा। नालिकेरार्घः। इदं नैवेद्यं वसोर्धाराभ्यो वः स्वाहा। गृ
हान्निर्गमि वामे च वसोर्धाराश्च वेदिका। कार्यविवाहे विप्रस्य गृहे वै पूर्वदक्षिणे॥१॥
गृहे वै पश्चिमद्वारे तथोत्तरकपाटके। वेदिका च वसोर्धारा गृहनिर्गमदक्षिणे। त
तो वृद्धिश्राद्धं। यवैर्व्रीहिस्तिलैर्घासिर्वा नवकुत्सुदर्भैः। विश्वेषां देवानां युग्मे पितृणां चत्वा
रि युग्मानि। अन्वष्टके पितृभ्यश्च तत्स्त्रीभ्यश्च सदैवतं। तान्यस्त्वदैवतं श्राद्धे नैतेन्य
क्ष्वापि सदैवतं॥१॥ इति वचनात्। षडेव युग्मानि। नाष्टौ। अक्रोधनैः। नांदीमुखदे

यदेव श्राद्धे०। पादप्रक्षालनं। आचमनं। युग्मस्य द्वितीये ब्राह्मणेनावनेजनं। ए
वं सर्वेषां। यवानृगृहीत्वा। प्राङ्मुखः प्रदक्षिणं कुर्यात्। अक्षोधनैः। नांदीमुख
मातृश्राद्धे०। अक्षो०। नांदिमुखपितृश्राद्धे०। अक्षो०। नांदीमु०मातामहश्राद्धे०
अक्षो०। नांदी०मातामही श्राद्धे०। आत्मपादप्रक्षालनं। आचमनं प्राणायामः।३।
स्वस्तिनोमिमीतामश्विना।५। संगमेमहीत्यंना। श्रीगणेशाय नमः।३। अपवित्रः प०नमः
स्वाहायै स्वाहायै नित्यमेव नवंभ्रते०। आभ्युदयिकश्राद्धोपहाराणां पवित्रता २९
स्तु। ॐ भूः। ॐ भुवः। प्रचोदयात्। उपास्मैगायतानरः। वर्ग। मधु।३। अद्याद्य अमुक
मासे अमुकपक्षे अमुकतिथौ अमुकदिने यथावर्त्तमाननक्षत्रयोगकरणमु

हूर्त्तसमवाये। एवंगुणविशिष्टायां पुण्यतिथौ। अमुकस्य विवाहोत्सवकर्मप्रा
रंभनिमित्तं मवं०। अमुकसगोत्राणां। नांदीमातृपितामही प्रपितामहीनां
। अमुकी अमुकी अमुकी देविदानां। अमुकसगोत्राणां। नांदीमुखपितृपिता
मह प्रपितामहानां। अमुका अमुका अमुकशर्म्मणां। अमुकसगोत्राणां। नां
दीमुखमातामह प्रमातामह वृद्धप्रमातामहानां। अमुका अमुका अमुकशर्म्म
णां। अमुकसगोत्राणां। नांदीमुखमातामही प्रमातामही वृद्धप्रमातामहीनां। अ
मुकी अमुकी अमुकी देविदानां। नांदीमुखवैश्वदेवपूर्वकं पार्वणचतुष्टयवि
धिना युष्मदनुज्ञया आभ्युदयिकश्राद्धमहं करिष्ये। नांदीमुखविश्वेदेवाः इदंवः

आसनं। एवं सर्वेषु। अमुक० त्राः। नांदीमुखमातृपितामही प्रपितामह्यः अमु
कीऽ देविदाः यथाविभागं इदं वः आसनं। एवं द्वितीये। अमुक० त्राः। नां० पितृपि
तामह प्रपितामहाः। अमुका २ अमुकशर्माणः यथाविभागं इदं वः आसनं।
एवं द्वितीये। अमु० त्राः। नां० मातामह प्रमातामह वृद्धप्रमातामहाः। अमु २ अमु
कशर्माणः यथाविभागं इदं वः आसनं। एवं द्वितीये। अमु० त्राः। नां० मातामही प्रमा
तामही वृद्धप्रमातामह्यः अमुकीऽ देविदाः यथाविभागं इदं वः आसनं। एवं द्वि २९
तीये। यवानू गृहीत्वा। ॐ आगच्छंतु० नवंतु ते। नांदीमुखान् विश्वान्देवानावाहयि
ष्ये। ॐ विश्वेदेवास आगत० वं। एदं। दन। विश्वेदेवाः शृणुतेम० यद्यं। ॐ ओषधयः संव

दंते सोमेन० मस्ति। एवं तृतीये। नांदीमुखी मातृरावाहयिष्ये। नांदीमुखान्पि
तृनावाहयिष्ये। नांदीमुखा मातामहानावाहयिष्ये। नांदीमुखी मातामहीरा
वाहयिष्ये। विश्वेषां देवानां अर्घा २ पितृणां अर्घाः २॥ पवित्रे द्वे द्वे सर्वत्र। शन्नो
देवी० त्तनः। यवोसि यव या स्म० रातीः। अत्र। चंदन पुष्प। धूपः। दीपः। नांदीमु
खानां विश्वेषां देवानां अर्घार्चनविधेः परिपूर्णतास्तु। ततः पितृणामर्घपूरणं॥
त्रा शन्नोदेवी० त्तनः। यवोसि सोमदेवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः
पुष्ट्या नांदीमुखान्लोकान् प्रीणाहि नः स्वाहा। एवं सर्वेषु। नांदीमुखानां मातृणां
पितृणां मातामहानां मातामहीनां अर्घार्चनविधेः परिपूर्णतास्तु। ॐ भूर्भुवः

स्वः।नांदीमुखविश्वेभ्योदेवेभ्योनमः।यादिव्या०वं०।नांदीमुखाविश्वेदेवाएतत्तेअ
र्घ्यं।एवंसर्वेषु।एवंपितॄणां।ॐभूर्भुवःस्वः।इतिअनुमुद्रार्घपात्रस्थापनं।अर्घोदक
वंदनं।इदमत्र।चंद०।धूपः।दीपः।यथादत्तं०र्चनं।नांदीमुखाविश्वेदेवावःस्वाहा।
इद०।अर्चनं०।अमुकसगोत्राः।नांदीमुखमातृपितामहीप्रपितामह्यः।अमुकी३
देविदाः।यथावित्तागंवःस्वाहा।इद०र्चनं।अमुक०त्राः।नांदीमुखपितृपितामह
प्रपितामहाः।अमुका३अमुकशर्म्मणोयथावि०स्वाहा।इद०नं।अमु०त्राः।नांदीमु २९
खमातामहप्रमातामहवृद्धप्रमातामहाः।अमुका३अमुकशर्म्मणोयथावि०स्वा
हा।इद०नं।अमुक०त्राः।नांदीमुखमातामहीप्रमातामहीवृद्धप्रमातामह्यः।अ

मुकी३अमुकीदेविदायाः।यथावित्तागंवःस्वाहा।इमानिअर्च्चितानिज्योतींषि
अर्चनविधेःपरिपूर्णतास्तु।आचमनं।ॐभूर्भुवःस्वः।अक्षन्नमीमदंतेतिय
वान्विकीर्य।भोजनसंकल्पः।भूर्भुवःस्वः।पृथिवी०विष्णोहव्यंरक्ष।इद०भोज
नं।नांदीमुखाविश्वेदेवावःस्वाहा।एवंसर्वेषु।भूर्भुवःस्वः।पृथिवी०विष्णोहव्यं
रक्ष।इद०भोजनं।अमुक०त्राः।नांदीमु०मातृ०मह्यः।अमुकी३देविदायाः।
यथावि०स्वाहा।ॐभूर्भु०पृथि०ष्णोहव्यं०इद०ऽनं।अमु०त्राः।नांदीमुखपितृ
पि०महाः।अमुका३शर्मणःयथावित्तागंवःस्वाहा।ॐभूर्भुवःस्वःपृ०हव्यंरक्ष।।उ
इद०भोजनं।अमुकसगोत्राः।नांदीमुखमातामह०महाः।अमु०र्मणो०स्वा

हा। ॐ तृन्नूर्त्तु वः स्वः स्वःष्ट॰ हर्व्यो॰ नोजनं अमुकसगोत्राः नांदीमुखमातामही॰ म
ह्यः। अमुकी३ देविदाः यथाविन्तागं वः स्वाहा। ॐ नूर्त्तु व॰ स्व॰ दया। उपास्मैगाय
तानरः वर्ग। मधु३ अत्राद्य॰ दिनेयथाव॰ तिपो अमुकस्यविवाहोत्सव॰ स व॰
र्घ। अमुकसगोत्राणां। नांदीमुखमातृपितामही प्रपितामहीनां अमुकी३ देवि
दानां। अमुकस॰ नांदीमुखपितृपितामह प्रपितामहानां अमुका२ अमुक
शर्म्मणां अमुकसगोत्राणां। नांदी॰ मातामह॰ अमुका॰ णां। अमुकसगोत्रा ३०
णां। नांदी॰ मातामही प्रमातामही वृद्धप्रमातामहीनां। अमुकी३ देविदानां।
नांदीमुखवैश्वदेवपूर्वकं पार्वणाचतुष्टयविधेर्यत्कृतं यन्न्यूनं तंत घस्मस्त्र

सादासंपन्नमस्तु। तथास्तु। एतद्वो ज्योतिः सूर्यो ज्योतिः। संकल्पसिद्धिः। विकिर
प्रक्षेपः। ॐ तृन्नूर्त्तु विः स्वः। स्मरणं। पात्रेजपः। ॐ नूः॰ यात् उपास्मैगायता॰ मधु३। अ
वनेजनं। आभ्युदयिके सर्वत्र पितृ वैश्वदेव नामयहणं प्राक् नांदीमुख पदप्र
योगः कर्त्तव्यः। दधिबदराक्षत मिश्राः पिंडाः कर्त्तव्याः। पिंडदानं। प्रत्यवनेजनं। अत्र।
नांदीमुखेभ्यो वासः। चंदनादि। अत्राच्छादन॰ वः स्वाहा। अत्राच्छादन॰ र्सतास्तु।
अनेन पिंडदानेन गृहे वृद्धिशतानि नवंतु। उत्तरे कर्म्मण्यविघ्नमस्तु। आचमनं। य
जमान नमस्कारं करोति। ततो वरं कन्यां प्राङ्मुख दहल्यां उपवेश्य संबंधिनी स्त्री
पीतवस्त्राच्छादिते तच्छिरसि सूर्पेण व्रीहीन् अवकिरेत्। ततो दक्षिण हस्ते लोहकं

कणबंधनं।एवंलोकाचारंत्वैच्छेवा।वरोनमस्कारंकुर्यात्।पुण्याहंदीर्घमायुरस्तु।
शिवा॰।सो॰।अस्तु॰।अस्यहिरण्यदक्षिणानिष्क्रयेऽवःस्वाहा।एवंसर्वेषां।पितृव
र्गेप्येवमेव।नरजतपदोच्चारणं।दक्षिणाःपांतु।बहु॰संपद्यंतां।नांदीमुखोमातरः
प्रीयंतां।नांदी॰पितरःप्रीयंतां।नांदी॰मातामहाःप्रीयंतां।नांदीमुखोमातामह्यःप्रीयं
तां।यासामुद्दिष्टंताःप्रीयंतां।येषामुद्दिष्टंतेप्रीयंतां।पिंडोपरिपवित्राणिन्यूब्जीमास्त
र्य।नांदीमुखान्पितृन्स्वाहांवाचयिष्ये।नांदीमुखीमातृभ्यःस्वाहोच्यतां।नांदीमुखेभ्यः ३१
पितृभ्यःस्वाहोच्यतां।एवंसर्वेषां।ऊर्जंवहंतीरमृतं॰स्वाहास्थतर्पयत॰न्।पुनर्दक्षि
णासंकल्पः।सोम्याःपितरःसंतु।इत्यादिपिंडचालनेनूर्ध्ववःस्वः।पात्रचालनं।संव

रमन्यफल्प।आदित्याद्याःग्रहाःप्रीयंतां।प्रजापतिःप्रियतां।स्थावरंसंयोगोस्तु।ब
हुपुत्रंबहुधनंचायुष्यंचास्तु।उत्तरेकर्मण्यविघ्नमस्तु।अस्तिवादयामिसहस्रवैः
इतिब्राह्मणाः।पुण्याहकालोवाच्यतां।पुण्याहंभवंतोब्रुवंतु।२।पुण्याहं।३।इतिब्रा
ह्मणाः।ऋद्धिंभवंतोब्रुवंतु।२।ऋध्यतां।३।इतिब्राह्मणाः।कल्याणंभवंतोब्रुवंतु।२।क
ल्याणं।३।इतिब्राह्मणाः।स्वस्तिंभवंतोब्रुवंतु।३।ॐस्वस्ति।इतिब्राह्मणाः।अद्यादेत्या
दि।अमुकदिने॰यथावर्त्तमान॰पुण्यतिथौअमुकस्यविवाहोत्सवकर्मप्रारंभनि
मित्तं।सर्वा॰र्थं।सर्वकाम॰र्थं।सर्वदुरि॰र्थं।अविघ्ने॰च।शास्त्रो॰र्थं।अमुकसगोत्रा
णांनांदीमुखमातृपितामहिप्रपितामहीनां।अमुकी२देविदानां।अमुकसगो

नां॰ पितृ॰ नां॰ अमुकार अमुकशर्म्मणां। अमुकसगो॰ नां॰ मातामह॰ नां। अमुकार अ
मुकशर्म्मणां। अमुकसगो॰ नां॰ मातामही॰ नां। अमुकीदेविदानां। आभ्युदयिकस्य
नांदीमुखवैश्वदेवपूर्वकस्य पार्वणश्चभष्टय विधिनाकृतस्य यः कश्चित् मंत्रोक्तो विधिः
सः सर्वो पित्रवतां प्रसादात् श्रीगणेशांबिकयोः प्रसादात्। आदित्यादिनवग्रहाणां
प्रसादात् उपविष्टब्राह्मणानां प्रसादात् सर्वः परिपूर्णोऽस्तु। न्यूना॰ स्तु। गृहे दे॰ वं
तु उत्तरे॰ मस्तु। त्वमूषु वाजिनं॰ वेम। इति विसर्जनं॥ इति वृद्धश्राद्धं समाप्तं॥ ॥ ३२
अथ कन्यावरणं॥ तत्र वंशपात्रीं नानाविध पुष्पाक्षतफलकुंकुमपूर्णां स्त्रीपरिधा
नयोग्य पट्टकूलाद्वृतां यवसंयुतां लोकाचार प्राप्त सर्वोपस्कर संपूर्णां। जातीचंपक

मालत्यादि सुगंधिकुसुमरचितस्रक्मुकुटसहितां हिरण्यालंकरणमुद्रकंकणं चाचा
र्य आदाय अन्यैर्वरगृह्यैः सह स्वतकुंकुमतिलकैः कन्यायाः पितुर्गृहे गच्छेत्। त
दा परिणेता अनृक्षराऽऋजव इत्यृचा कन्यावरणार्थं गच्छतो वरकान् वाञ्छते। तत
आचार्यः पुष्पफलयवानुदकं चाचार्य कन्यायाः पितुर्मंडप द्वारे स्थित्वा अमुकस
गोत्रः अमुकाऽमुकशर्मा। अहं भो इति त्रिः कथयति। ततः कन्यादातगृह्याः पीतव
स्त्रखंडाच्छादिते उच्चतरपीठे कन्यां पुण्याहवाचनपूर्वकं पूर्वाभिमुखीमुपवेश्य क
न्यायाः पश्चिमतः पूर्वाभिमुखा उपविशंति। आचार्यप्रमुखवरकास्तु कन्यायाः पुरः
पश्चिमाभिमुखा उपविशंति। उपविश्य च अमुकसगोत्र देवदत्तः अमुकशर्म्मा

वरःअमुकसगोत्राःदेवदत्तयज्ञदत्तमित्रदत्ताःवरस्यपितृपितामहप्रपितामहाः।
अमुकसगोत्राःअमुकाशर्म्मणोवरस्यमातामहप्रमातामहवृद्धप्रमातामहाः।
इतिविख्यातविशुद्धोत्तयकुलायास्मद्रायत्वदीयांकन्यांधर्म्मादिसकलपदार्थसि
द्धयेदेहि।इतिकन्यादातारंप्रार्थयंते।ततःकन्यादाताअहंत्वन्नत्रउपस्थितेअविक
लेंद्रियायापापायतस्मैदास्यामि।इत्यंगीकरोति।ततोद्वावपिपद्धौअनाधृष्टमस्य
माधाःइतिमंत्रेणोदककुंभस्थांजलपूर्णांपुष्पाक्षतफलयवहिरण्यमिश्रांयज्ञिय ३२
वृक्षजामुत्तमधातुमयींवापूर्णपात्रीमभिमृशतः।ततःआनःप्रजां०चतुष्पदे।प्रजां
त्वयिदधामिपशूंस्त्वयिदधामितेजोब्र०मि।इत्युक्त्वाआचार्यस्तिष्ठन्कन्यामूर्द्धनि

तांपूर्णपात्रीमुंचंति।एवंकृत्वातेवरगृहमागत्यांगीकारेकृतेप्रतिश्रुताकन्याभ
वति।तच्चतांबूलदानाचारपूर्वकं॥ ॥इतिकन्यावरणं॥ ॥अथतांबूलदानाचारः॥
तत्रवरस्यपादौप्रक्षाल्यललाटेकुंकुमतिलकंकृत्वा।हैमं।कार्पासंचोपवीतं।व
स्त्रयुग्मंच।कन्यादाताअस्मैददाति।ततोधृतवस्त्रयुग्मस्योपविष्टस्यास्यकंठेक
न्याप्रदःसुरभिकुसुमस्रजाबध्वामांगल्यंकरोति।ततोऽक्षतान्गृहीत्वावरस्य
दक्षिणांजलावन्वारभ्यइदंमंत्रंपठति।तस्मिन्कालेअग्निसान्निध्येस्नातस्नाता
ह्यरोगिणि।अव्यंगेअक्लीबेअपतितेत्वयिकन्यानविष्यति।ततःसप्तपूगोपेता
निसप्तनागवल्लीदलानिददाति।ततश्चतत्रसौवासिन्योवरमवकिरंति।आशी

वदिः। लग्नपत्रिकाश्रवणं। पुण्याहं दीर्घं इत्यादि दक्षिणासंकल्पः। तांबूलदा
नकर्मप्रतिष्ठासिद्ध्यर्थं। हिरण्यं द्रव्यं दत्त्व पुरुष ब्राह्मणेभ्यो हं संप्रददे। तदा वरो
पि दक्षिणासंकल्पं करोति। पुण्याहं दीर्घमायुरस्त्वित्यादि स्थिरीकृत्वा स्थिर पत्रक
र्मणः प्रतिष्ठासि० हिरण्य० द्रव्य पुरुष ब्राह्मणेभ्यो हं संप्रददे। ततो दक्षिणः पाणित्या
दि तन्नौ युगपत् पाठः। इत्यादि सर्वं किं कं कार्यं॥ ॥इति तांबूलदानं॥ ॥अथ प्रति
स्रुताकर्म्म॥ ॥आचमनं स्वस्त्ययनमित्यादि आज्यभागांतं कृत्वा। ॐ अग्निर्जनिता। ३४
समे अमुकीदां जायायां ददातु स्वाहा। ॐ सोमो जनिमां समाम्नु अमुकीदाया जायया
जनिमतं करोतु स्वाहा। ॐ पूषा ज्ञातिमा समा अमुकीदायै जायायै पित्रामात्राभ्रा

तृभिर्ज्ञातिमंतं करोतु स्वाहा। इति स्रुवेणाज्याहुतीर्जुहोति। ततः स्विष्टकृदादि
शांत्यंतं समापनीयं॥ ॥अथ ऐंद्राणीकर्म्म॥ ॥विवाहात्पूर्वस्मिन्दिने तद्दिनादपि
पूर्वस्मिन्दिने वा। अर्द्धरात्रात् ऊर्ध्वं कन्यागृहे वेदिकायां एतत्कर्म भवति। तत्र आ
चमनाद्याज्यभागांतं कृत्वा कृतमंगलस्नानां कन्यां अग्नेः पश्चात् उपवेश्य अन्वार
ब्धायां स्रुवेण जुहोति। ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा। ॐ भूर्भुवः स्वः
स्वाहा। ॐ अग्नये०। सोमाय०। प्रजापतये०। मित्राय०। वरुणाय०। इंद्राय०। इंद्रा
ण्यै०। गंधर्वाय०। भगाय०। पूष्णे०। त्वष्ट्रे०। बृहस्पतये०। राज्ञे प्रत्यानीकाय०। एकं।
आज्याहुतिः। स्रुवेण हुत्वा ततः अस्मिन्विवाहहोमशेषं सर्वेन्कृत्य नार्पं चतस्रः सोवा

मिनीरविधवाःशूद्रस्त्रियःशाकसुरान्नैरहं तर्पयिष्ये। इति संकल्पं कुर्यात्। अस्य
इंद्राणीकर्मणः समृध्यर्थं ब्राह्मणमेकं अहं तर्पयिष्ये॥ ॥इति संकल्पः॥ ॥स्वि
ष्टकृदादिशेषं समापनीयं। कर्मापवर्गे ब्राह्मणभोजनं॥ ॥इति इंद्राणीकर्म॥
एवं आचार्यः कन्यागृहे इदं कर्म कृत्वा तत्तत्कालमेव वरगृहे गत्वा तस्यामेव
रात्रौ अग्निस्थापनं कृत्वा एवमेवैतदेव कर्म करोति। अपवा वर एव स्वयं चेत् करो
ति। तर्हि मुख्यः पक्षः। आचमनाद्याज्यभागांतं कृत्वा व्याहृतिचतुष्टयं कृत्वा अग्न ३५
ये सोमायेत्यादि। राष्ट्रभृत्यानीकायेत्यंतं कृत्वा। ॐ वैश्रवणाय स्वाहा। ॐ ईशाना
य स्वाहा। इति द्वे आहुती अधिके जुहोति। एवं आहुतिः १९ शूद्रस्त्रीतर्पणसंक

ल्पः॥ ब्राह्मणभोजनसंकल्पः॥ ततः स्विष्टकृदादि सर्वं समापनीयं कर्मापवर्गे ब्रा
ह्मणभोजनं पृथक्। आधुनिकास्तु लोकाः प्रमादात् इदं कर्म वरगृहे पृथक् न
कुर्वंति। किंतु कन्यागृहे एव आचमनादिपूर्वोक्तं सर्वं शूद्रस्त्रीतर्पणब्राह्मण
नांतं कृत्वा तस्मिन्नेवाग्नौ व्याहृत्यादि ईशानायेत्यंता एकोनविंशतिमाहुतीः पु
नर्जुह्वति। पुनरपि शूद्रस्त्रीतर्पणसंकल्पं ब्राह्मणभोजनसंकल्पं च कृत्वा स्वि
ष्टकृदादिशेषं समापयंति। कर्मापवर्गे ब्राह्मणमेकमेव॥ ॥इतींद्राणीकर्मवि
त्तिसमाप्तिः॥ ॥अथ विवाहकर्म॥ ॥तस्योपहाराः॥ बर्हिब्रह्मादि। स्रुगिध्मेध्मण
चरुस्थालीवर्जं। लाजा लाजाः शमीपत्रमिश्राः। उदकुंभः सोपस्करः। दृषदुपले। शमी

गन्धविन्दुत्वक् मदनफल २ मधुपर्कोपहारः कांस्यपात्र २ ताम्रपात्र २ अप
वामुद्रिके २ वाससी २ उपानहौ। कूर्चा यवा इति मधुपर्कोपहारः। तपान्यद
पि। यवा। शाजली। इत्यादि। दर्भत्रिशाख। चांबठ। शमित्री। घसी सूकेड। ॐ ऊम।
उदकपात्रीं जलपूर्णां। अर। सो। आचमनाद्यभ्यंतागांतं कृत्वा। स्वस्तिवाचकब्रा
ह्मणैः स्वस्तिसु प्रोक्षितादि सुशांतिर्नवत्यं तं कृत्वा। अस्य विवाहांगस्य स्वस्तिवा
चनकर्मणः प्रतिष्ठासिध्यर्थं हिरण्यदक्षिणां नि॰ स्वस्तिवाचकब्राह्मणेभ्यो ३६
ईसंप्रददे। यो यस्य वि॰ तां। दक्षिणाः पांडु। इत्यादिकल्याणंतवंतोब्रुवंतु इत्यंते
पठित्वा। स्वस्ति नवं तो ब्रुवंतिति। ब्राह्मणानां इस्तेषु। अस्य विवा॰ स्वस्तिवाचनक

र्मणो यन्यू॰ वह्निप्रसादात् स्तु। गृहे वृद्धि॰ ततः आगतस्य वरस्य मस्तके स्वस्ति
वाचका अक्षतान्मुंचंति। तदा कोऽपि दंपती शामी गन्धविन्दुलक्षेपणं कुरुतः।
ततो मधुपर्कः। तस्यायं विधिः। वेद्याभ्यन्तरतो द्वे पीठे प्राङ्मुखोपवेशनार्थं स्था
पयेदेकमुदङ्मुखोपवेशनाय च। तत्रागतो वरः प्राङ्मुखस्तिष्ठेत् कन्यादाता
चोदङ्मुखस्तद्वद्दक्षिणतः कन्याजननी च। ततः कन्यादाता तिष्ठन्नुदङ्मुखः पठ
ति। ॐ साधु भवानास्तामर्चयिष्यामो भवंतं। इति आचार्यः। इति वरः प्राङ्मुखस्तिष्ठ
न् कल्पयति। ततो दाता कूर्चं गृहीत्वा कूर्चः ३ प्रतिगृह्यतां इत्याह। प्रतिगृह्णामि।
इति वरः। ततः पीठे उत्तराग्रं कूर्चं आरोप्य वरः पूर्वाभिमुख उपविशेत्। अहं व

ष्म॰दास्मति। इतिमंत्रेण। ततः कन्यादाता उदङ्मुखउपविश्य। पाद्यं ३ प्रतिगृह्य
तांइत्याह। वरश्च प्रतिगृह्णामि। इत्युक्त्वा। ॐ विराजोदोहो॰दोह॰ इतिमंत्रे
णगृहीत्वा तद्भूमौ स्वपादयोर्निनयेत्। दाता अर्घ्यमर्घ्यमर्घ्यं प्रतिगृह्यतां। इत्या
ह। वरः प्रतिगृह्णामीतिगृहीत्वा तद्भूमौ स्वपादयोर्निनयेत्। आचमनीयमाच
मनीयं प्रतिगृह्यतांइतिदाता। प्रतिगृह्णामीतिवरः। आपोहिष्ठेतितिसृत्तिरेके
कयाचामेत्। मधुपर्को३पर्कः प्रतिगृह्यतांइतिदाता। प्रतिगृह्णामीतिवरः। ३१
ततोदाता उद्घाटितं मित्रस्यत्वा॰ क्षे॰ इतिवाच्य। ॐ देवस्यत्वा॰ गृह्णामि यशसे
ब्रह्मवर्चसाय इतिगृह्य इतिसव्ये पाणौ कांस्यपात्रं मुक्त्वा अंगुष्ठेनानामिकयाच

पूर्वादिक्षिहीत्वा कांस्यपूर्वार्द्धे ॐ वसवस्त्वा॰ न्तु। इतिनिलिंपति। पुनर्दक्षिणार्द्धे।
ॐ पितरस्त्वा॰ न्तु। इतिदक्षिणार्द्धदक्षिणोर्द्धे। उदकपनं। आदित्यास्त्वा॰ न्तु। इति
पश्चार्द्धात्पश्चार्द्धे। रुद्रास्त्वा॰ न्तु। इतिउत्तरार्द्धे॰ उदकोण॰। विश्वेत्वा॰ न्तु। इ
तिमध्यार्द्धे। सर्वत्र सत्त्वन्मंत्रेण। दक्षिणक्षौ। ॐ भूः इति प्राश्य। ॐ भुवः इतिप्रा
श्य। ॐ स्वः इति प्रा॰। ॐ भूर्भुवः स्वः प्रा॰। शन्नोदेवी॰ शो॰ षि। इतिऋच अपरित्वा।
उदकोप॰। ॐ प्राणेपाश्रसि॰ हि। नासिकेमुखं ऊ चक्षुं। चक्षुष्पा॰ हि। इतिचक्षु
षी। ॐ श्रोत्रपा॰ हि। श्रोत्रोप्रतिश्रोत्रं मंत्राट्टत्ति। इंद्रस्यत्वा॰ मिनानि। अनुलोमा
र्ध्वेष्टं। इतिमुखं विसृज्यपस्थितेदाता गोगौगौः। इत्याह। ततोवरः ॐ माँरुद्राणां॰ व
ता

धिष्टा। ॐ मुक्त्वाऽतत्तृणान्यत्तु। इतिपठति। ततोदातामाधुपर्किको धेन्वै तृणा
निदद्यात्। मधुपर्कसंकल्पः। पुण्याहं दीर्घमायुरस्तु। इतिवरहस्ते। शिवा॰ सौ
मनस्य॰ अक्षतं॰ वरहस्ते। ततः स्वशिरसि दीर्घमायुरित्यादि सुशांति र्नेवस्ति
त्यं तत्त्वादत्त्वं न्दिता न गृहीत्वा। अस्मिन्मधुपर्ककर्मणि कांस्यपात्रद्वयं ताम्र
पात्रमेकं मुद्रिकेवा ससितपानहौ माधुपर्किकीं गांच सर्वदेवमयब्राह्मणाय
वरायतुभ्यमहं संप्रददे। इतिवरहस्ते जलं दद्यात्। अस्य मधुपर्कदानकर्मणः ३८
प्रसादाद्वरः प्रसादाद्वक्ष्येः प्रसादा॰ स्तु। गृहे वृद्धिः शता॰ उत्तरे॰॥ ॥इतिमधुपर्क
विधिः॥ ॥ततः कन्यादानं॥ कन्यावेद्याः प्रदक्षिणमानीय वराद्दक्षिणतः प्रवेश

येत्। ततो दाता वरस्य पूजनं करोति। कन्यादाननिमित्तं वराय एतत्तेपाद्यं। एषते
र्घः पूज्ञा। स्वस्तिनइंद्रो॰ पादप्रक्षालनं। दाता पत्नीउदकं पादप्रक्षालनार्थं नि
नयेत्। कन्यायाश्च पादप्रक्षा॰ आचमनं। वरकन्ययोः स्वपादौ प्रक्षाल्य आच
मनं प्राणायामं कुर्यात्। पुनराचमनं। ॐ स्वस्तिनोमिमीता॰ संगमेमहि। श्रीगणे
शायनमः॥ ॐ॥ अपवित्रः पवित्रोवा॰ सुरे। सप्तव्याधा॰ स्पर्शाच्च। कन्यादानोपश
राणां पवित्रतास्तु। ॐ नूः॰ नूनमुपास्मैगायता॰ मधु ॐ। अद्य अमुकमासे अमु
कपक्षे अमुकतिथौ शास्त्रोक्तपुण्यफलावाप्त्यर्थं कन्यादानमहं करिष्ये। अ
मुकदिनेयथा वर्त्तमान नक्षत्रयोगकर्णपर्वलग्नमुहूर्त्तसमवाये। एवंगुण

वशिष्टायां पुण्यतिथौ शास्त्रोक्तपुण्यफलावाप्त्यर्थं कन्यादानमहं करिष्ये। वरक
न्यामात्रचंदनादिगुग्गुलधूपः। यथा दत्तं॰ सर्वदेवमयब्राह्मणाय वरायत्र॰
दि। इमानि अर्च्चितानि ज्योतींषि। अर्च्चनविधेः॰ स्त्का। आचमनं। अच्छन्नमी॰ इ
रो। अयवान्विकीर्य। यथा दास्यमानं तृप्तिपर्यंतं भोजनं सर्वदेवमयब्राह्मणा
यवराय॰ दे। पुण्याहं दीर्घमायु॰ वरहस्ते। कन्यायाश्च। शिवा॰ सौ॰। अस्तु॰। ततः स्व
शिरामि। दीर्घमायुरस्त्वित्यादि सुशांतिर्भवत्वित्यंतं कृत्वा। दर्भान्हृत्तान्गृहीत्वा। ३९
अद्यश्री॰ देशे च। अमुकसगोत्रस्य अमुकामुकशर्म्मणः प्रपौत्राय। अमु
कसगोत्रस्य अमुकामुकशर्मणः पौत्राय। अमु॰ पुत्राय। अमुकसगोत्रा

य। अमुका अमुकशर्म्मणे वरायत्रन्त्यं। अमुकसगोत्रस्य अ॰णः प्रपौत्रीं। अमु॰
णः प्रपौत्रीं। अमु॰ णो मम दुहितरं। अमुकसगोत्रां अमुकीदानाम्नीं कन्यां पं
चेंद्रियरूपहतशरीरिणीं वस्त्रयुग्मेनाच्छादितां सोपानत्कां सुवर्णरजतादि
यथाशक्त्यलंकृतां प्रजापतिदैवतां अमुकसगोत्रः अमुकामुकशर्म्मा
हं कन्यादानजनितयथोक्तफलप्राप्तिकामः अहं संप्रददे। न मम। इत्युक्त्वा
कन्यायाद्दक्षिणं हस्तं वरायदक्षिणे हस्ते दद्यात्। ततो वरः ॐ प्रजापतये त्वा॰
मशीय प्राणे दात्रे एधि॰ न॰ ॐ को दात्॰ तत्रे। इति पठति। ॐ ततो दाता ॐ अस्म
न्माता मधुमदिंविन्त्रागच्छत। प्रदानात्मा विशत। दत्वा ज्ञपति। इति पठति। ता च स्व
ती

माणंकुर्यात्। दक्षिणसंकल्पः॥ अस्य कन्यादानकर्मणः सम्पूर्णतया प्रतिष्ठार्थं यथापादास्यमानां गांरुद्रदैवतां यथोपस्कर सहितां सर्वदेवमयाय ब्राह्मणाय वराय ॰ दे। दक्षिणः पांचि
त्यादि। स्वस्तिन् वंतो वरहस्ते। अस्य कन्यादानकर्मणो यन्न्यूनाति॰ गृहे ध्वत्तरे॰ स्क।
इति कन्यादानं॥ ॥ततः कौतुकाचारः॥ तत्रादौ परस्पर मदनफलबंधनं। ॐ रैत्या
सी॰ परिष्कृतं। इतिवरः कन्यायै अधरं वस्त्रं ददात्। चित्तिरा उप॰ पतिं। इति कज्जल
पात्रीं गृहीत्वा। ॐ समंजंतु॰ दधाउनो। इति कन्यायानेत्रांजनं करोति कन्यापितृ
स्त्री वनैरं त्रांजनं करोति। ॐ यथेयं शची वावातां॰ नि। इति कन्यायादक्षिणेहस्ते
शालजीं ददाति। ॐ रूपं रूपं प्रतिरूपो॰ दश। इत्यादर्शं वामहस्ते। ततः कन्यायान्त्रा ५ श्री

त्रादिः। ॐ नीललोहितं भवति॰ बध्यते। इति कन्यायाः कंठे हारं बध्नाति। ॐ मधुमती रो
षधी॰ चरेम। इति वरो मधूकानि बध्नाति॥ ॥इति कौतुकाचारः॥ ॥ततः कर्मवेदिका
मध्ये। अग्नेः पश्चात् कन्यावरौ आचार्यश्चैते। उपविशंति। तत्र कारः। उत्तरतः आचा
र्यः। आचार्य दक्षिणतो वरः। वराद्दक्षिणतः कन्या। तत्र अन्वारब्धं कुर्वाणायां आचार्यः
स्रुवेण महाव्याहृतिभिः स्त्रिस्त्र आज्याहुतीर्जुहोति। ततः कन्यादाता प्राङ्मुखः सन्मु
खस्तिष्ठन् प्राङ्मुखा आसीनायाः कन्यायाः शिरसि। ॐ सम्राज्ञी श्वशु॰ देवृषु स्वाहा॥
इति घृतं जुहोति। ततो विष्णुपुण्याहं ३ इति ब्रूवत्सु वरस्तिष्ठन्नासीनायाः प्राङ्मुखा
याः प्रत्यङ्मुखः कन्याया हस्तं सांगुष्ठं शमीगर्भाश्वत्थ कर्णपुटकं उत्तानउत्ताने

नहस्तेनगृह्णाति।ॐगृभ्णामिते॰देवाः॥इतिमंत्रेणततः।ॐतांपूषन्॰इमां।अमोहम
स्मि॰जरदष्टयः॥इतिजपति।ततआचार्यः।स्थंडिलस्यकोणसंलग्नमीशान्यांउदकुं
भंनवंस्थापयित्वा।ॐभूर्भुवःस्वः।इतिपूरयित्वाआम्रादिपल्लवाणिहिरण्यंचमध्येनि
क्षिप्य।ब्रह्मचारिणंतंकुंभंनमन्वारब्धंतमुपवेशयेत्।ततोवरःएहिसूनरि।इत्युक्त्वा
कन्यामुत्थापयसुग्मान्ब्राह्मणान्सूर्यंपाठयेत्।अश्मनःकर्मणादवन्हिकन्यापितृपु
रतःस्थिता।अतऊर्ध्वंदृष्टस्थामंगलातिक्रमेच्चसा।ॐएह्यश्मान॰मृतनायतः॥इ ४१
तिपठन्वरःतांपुरःकृत्वादक्षिणेनपादाग्रेणअश्मानमाक्रमयति।ततःस्वयंपुर
तोभूत्वावन्हिमुदकुंभंचपर्याणीय।ॐअरेम्यामो॰भूतं।इतित्तरीयंवस्त्रंकन्यायैद

द्यात्।प्रदक्षिणंपरिणयेदुदकुंभंचइतिसूत्रोक्तेः।ततःआचार्यःकन्यायाअंजलौस्रु
वेणघृतंमुंचति।कन्याभ्रातावर्णाशूर्पात्लाजानांअवदानद्वयंमुंचति।पुनः
स्रुवःअभिघारः२लाजानां।ॐइयंनार्युपब्रूते॰स्वाहा।तिष्ठंतिजुहोतिपतिमंत्रंज
पति।कन्यांपुरतःकृत्वा।ॐएह्यश्मान॰तइतिपूर्ववत्।अश्मानमाक्रमय्यस्वयमये
भूत्वावन्हिकुंभौप्रदक्षिणंपर्याणीयआचार्येणपूर्ववत्लाजानांचतुर्गृहीते
कृतेइमंयुंनार्युप॰पतिमंत्रंजपति।स्त्रीजुहोति।एवमश्मानस्तृतीयं।तूष्णींचतुर्थं॥
वरांगुष्ठाचारः।तस्यद्वितीयेवदानेसर्वकोणेनचावपेत्।प्रागुदीच्यां॰सप्त॰ति।
इषएकपदीभव।॥ऊर्जे॰२।रायः॰३।आयो॰४।पशु॰५।ऋतु॰६।सखा॰७॥

र्वित्कस्तानयत्तु। तान्यद्भिः। ॰ आपोहिष्ठा॰ त्वनः। इत्याचार्यतिष्ठन्। उदङ्मुखः
कौतेगृहीत्वाघ्रं प्रत्यृचं कन्यां पूर्वं पश्चाद्वरं मार्ज्जयित्वा कन्यावरस्यच मूर्द्धनिनिनी
यकरं मोचयति। ऊर्द्ध्वैतौ प्राङ्मुखास्तां मध्यमाद्युत्तरे पदे। प्रदानितानिवान्यार
द्भिः प्रोक्ष्यात्र शुवकः तिष्ठन्नुदङ्मुखो विप्रत्कन्यशं दक्षिणेइस्तयोः द्वचेनापोत्नि
षिंचोत्तोमपध्नवैः सकुशोदकैः अस्त्रिकामूर्द्धनिनयोकौतेनैवावसिंचति। अयो
पकपविंशति। वरः गां ददाति। पुण्याहं दीर्घमायुरित्यादि सुशांतिर्नवात्विस्यंतं कृत्वा ५२
अस्य विवाहोत्सवकर्मणः समृध्यर्थं इमां गां रुद्रदैवतां यथोपस्कर सहितां आचा
र्याय तुभ्यमहं संप्रददे। याधुवस्त्रस्वर्यपात्रकब्राह्मणेभ्योऽहं संप्रददे। अस्य वि

वाहोत्सवकर्मणः प्रतिष्ठासिद्ध्यर्थं न्यूनातिरिक्तपरिपूर्णार्थं यथोत्साहं भूयसीं दक्षि
णां नानागोत्रेभ्यो ब्राह्मणेभ्यो ऽहं संप्रददे। दक्षिणां पात्रु। वक्तुदेयं॰ इत्यादि स्वस्ति
त्वं वंतोक्तवंतु। अस्य विवाहोत्सवकर्मणो॰ स्त॰। पुण्याहं॰ भवंतु॰ स्त॰। एवं स्वकवेणस्वि
ष्टकृत्। उ॰। सप्तकं। सव्योपालौ येकुशा॰ तेषामग्रं स्वकवेण॰। इत्यादिशांत्यंतं।
। दिनत्रयं कुशंडिकां कृत्वा पूर्णाकृत्वा हुता आकृतिद्वयं स्वकवेण सायं प्रातर्जु
होति। तत्रैवाग्नौ। अग्नये स्वाहा। अग्नयेस्विष्टकृते॰। सप्तकादि तत्र शेषं स
मापनीयं। गृहगमनकाले। प्रत्वामुंचामीत्यादि। ततो मंडपाचारं कृत्वा। वरगृहे
गत्वा मंडपे एवमानुड्कर्म। आचम्यामनाद्याज्यनागोत्रं कृत्वा। आनुदुहेक

न्यामुपवेश्य। अन्वारब्धायां पतिश्चतस्र आज्याहुतीर्जुहोति। अग्निना देवेन० शम
यामि अमुकी दास्वाहा। ना०। सू० चं। अघोरचक्षु० दे। इति कन्यात्मक्षणी आज्येन
विमृज्जीत। कयान०ऽतिति॥ केशान् अन्तिमृश्यत तात्यादैव्या० विश्ववेदसः स्वाहा॥
मूर्द्धनि संस्रावं जुहोति। कुमार मुत्संगे आनीय तस्यांजलौ फलानि दत्वा पुण्याहं०
इत्या ब्राह्मणहस्ते स्वस्ति तत्वंतो ३॥ स्विष्टकृदादि सर्वं समापनीयं। इडे वसत०र
धात्तनौ। इति उक्ते ब्राह्मणास्तां गृहं प्रवेशयंति। दधिक्राव्णो दधिप्राशनं। मोनं। ध्रु ४३
वेधिमा०शांतं इति ध्रुवं दर्शयति। ध्रुवं पश्यामि० इति वधूः॥ ॥ अथ चतुर्थी क
र्म। आचमनादि। सवित्रर्व इत्यंतं कृत्वा अग्नये वायवे सूर्याय अर्यम्णे वरुणाय। प्रत्ये

प्रजापतये जुष्टं गृह्णामि। वार ३। चतुर्पञ्चर्ह्मी। आसनादि आज्यभागांतं कृत्वा। अग्ने प्रा
यश्चित्तिरसि इत्यादि त्रिः सप्त। त्रिर्मत्रे चतुर्गृहीतेन सप्तचर्वाहुति होमं कुर्यात्। स्वि
ष्टकृत् सप्तकं। दक्षिणासंकल्पः। तत्र अधास्याः सर्वे पापलोकाश्चयं इत्यादि। ब्राह्मणे
पूर्णपात्रं दत्वा वस्त्रकंचुकी परिधान मांगल्योकादि काचारः। आशीर्वादः। ब्रह्मोत्स
र्जनादि शांत्यंतं समापयेत्॥ ॥ अथ गर्भाधानादि सीमंतोन्नयन पर्यंतं कर्म गृह्ये
चतंत्रेण लिख्यंते। मातृस्थापनं। वसोर्धारा। वृद्धिश्राद्धं। आचमनादि सवित्रर्व इत्यं
कृत्वा गर्भरक्षणचरुश्रपणं। रक्षोघ्ने अग्नये जुष्टं गृह्णामि। वार ३ चतुर्पञ्चर्ह्मी।
र० मासदयामि। ततः सीमंतचरुश्रपणं। धाता इतिलिंगोक्त देवताः ०भ्यः प्रजापतये

जुष्टं गृह्णामि ३। चतुर्थं द्विर्हिङ्कृती॥ धा॰ मासादयामि। रक्षोहाग्नये त्वा जुष्टं प्रोक्षामि।
धात्रे लिंगो॰ प्रजापतये जुष्टं प्रोक्षामि। समिदादि संप्रोक्ष्य परोषोद॰ त्क्रा॥ त्रिः प्र॰
अधि॰ श्रिता॰ एणं चतुर्नयोः। उदग्गुद्वासनं। श्रितानां पूर्वेण उद्वासितानां उ
त्तरतः। पात्रप्रक्षालनादि आज्यभागांतं कृत्वा। गर्भाधानकर्मणः कालातिक्रम
दोषनिवृत्त्यर्थं सर्वप्रायश्चित्तमहं करिष्ये। ॐ भूर्भुवः स्वः स्वाहा। अयाश्चाग्ने॰ स्वाहा॥
ततः पुरस्तात्संज्ञकं महाव्याहृति चतुष्टयं कृत्वा। पर्णफलनीमूलं निःपेष्य ना ५३४
सिकायोग्यं कृत्वा। उदीर्ष्वातः पतिवती॰ विश्वा॰ स्वाहा। इति सा मंत्रित्या दक्षिण
नासिकायां षिंचेत्। गंधर्वस्य॰ सि॰ सि। इत्युपस्थं स्पृशेत्। ततः प्राणेनेरेतो दधा

मि अमुकसगोत्रे अमुकी देव धूं अवजिघ्रति। उपरिष्टात्संज्ञकं महाव्याहृति
चतुष्टयं कृत्वा। पुंसवन प्रायश्चित्तं। भूर्भुवः स्वः स्वाहा। अयाश्चा॰ हा। वटशुंगां
पेषयित्वा पुरस्तात्कृत्वा अग्निनारयिंतन्नस्कृरीयमध समिद्धाग्निर्व॰ पिशंगरू
प इति च तस्त्रृत्तिः स्वाहांता त्रिः सिमंत्रिन्या दक्षिणनासिकायां सिंचेत्। उपरि
ष्टात्कृत्वा। गर्भरक्षण प्रायश्चित्तं। ॐ भूर्भुवः स्वः स्वाहा। अयाश्चा॰ स्वाहा। ब्रह्मणा
ग्निरिति षड्भिः स्वाहांतानिर्भिः प्रत्यृचं च चरुं गृहीतं। प्रथमं चरुं कुर्यात्। अ
क्षीत्यांत इति वर्गेण प्रत्यृचं माज्यं जपेन सीमंत्रिन्या अंगानि मंत्रलिंगोक्तक्रमे
ण विसृजीत। सप्तमो मासो तिक्रांतश्चेन्नर्हि सीमंतोन्नयनस्य प्रायश्चित्तं कृतं।

कृत्वासीमंतिन्यामन्वारब्धायांचतस्रनिर्व्याहृतिर्तिःस्रुवेणाज्यंकृत्वाचदानधर्मेण
चरुंजुहुयात्।धातादधातिदाशुषे०णःस्वाहा।धाताप्रजायाऽजुहोतेतिस्वाहा।
नेजमेषपरापत०पुमानस्त्वा०।यथेयंपृथिवीमह्युत्ताना०सूतवेस्वाहा।विष्णोःश्रे
ष्ठेनरूपेण०स्वाहा०।प्रजापतेनत्वदेता०णांस्वाहा।त्रिश्वेतयाशलल्या०मुन्नयति।
ॐभूर्भुवःस्वःइति।अपकोदुंबरफलहारंसिमंतिन्यात्संगेनिधाय।अयमू
र्जावतोन्नवाइतिकंठेबध्नातिउदपात्रेच्छतान्मुक्का।विष्णुर्योनिंकल्प०एक
याराकामइंषद्भिःप्रसूचमस्तनोदकंपाययेत्।नात्रस्वाहाप्रकारः।सुपर्णोसि०
तन्मः।इत्युदरंस्पृशेत्।पुमांसौदीर्घमा०स्त्का।इत्यादिस्तुशांतिर्भवतु।अस्यसीमं ४५

तोन्नयनकर्मणःप्रतिष्ठासिद्ध्यर्थंकृषयन्तदक्षिणानिष्क्रयेयथापादास्यमानंद्रव्यंआ
चार्यायतुभ्यमहंसंप्रददे।दक्षिणांपात्वित्यादिस्वस्तिभवंतोब्रुवंतुउभयोस्त्व
र्वाग्रकेकमवदानंगृहीत्वास्विष्टकृतसमस्तकं।सव्येपाणौ०स्रुच्यर्थं०तिस्रःसमिधः।
यपो०इदं०प०बर्हिर्होमः।अमीषांकर्मणांसिद्ध्यर्थं।हिरण्यंपं०व्यंयथोत्साहंभूयसी
दक्षिणांनानागोत्रेभ्योब्राह्मणेभ्योहंसंप्रददे।प्रणीताविमोकः।मांगल्यं।वर्हीय
नं।आशीर्वादाः।ब्राह्मणेपूर्णपात्रं।ब्रह्मोत्सर्गः।अमीषांकर्मणांसिद्ध्यर्थंयथासंपन्ने
नान्नेनचतृप्तिपर्यंतेनभोजनेनब्राह्मणमेकंअहंतर्पयिष्ये।भगवत्यःकर्मांगदे
वताःप्रीयंतां।ग्रहाःपंच०।त्रयोवै०अमीषांकर्मणांयन्न्यूनातिरिक्तं०स्त्का।गृ०भूत०

स्त्व॥ ॥पाकयज्ञाःसमासाद्यैकाग्न्यानेकबर्हिषः।एकःस्विष्टकृतःकुर्यान्नानापिस
तिदैवते।इत्याश्वलायनकारिकायां।अनेकेपाकयज्ञाःस्फरेकस्मिन्काल एवचे
त्।समानतंत्रकाकार्यानितंत्राहृत्तिरिष्यते॥ ॥अथजातकर्मनामकर्मान्नप्राश
नानि॥ ॥पुत्रेजाते।हिरण्यंश्राद्धं लिख्यते।जातमात्रश्रवणेपितुरस्पृश्यत्वं।सचैलं
मंगलस्नानं।वस्त्रपरिधानं।तिलकंदेवपूजा।।आचमनंप्राणायामः।३।पुनरा
चम्य।ॐश्रीगणेशायनमः।३।अपवित्रःपवित्रोवा०सबाह्याभ्यं०स्तु।हष्टिः०हिरण्यश्रा
द्धेपद्मरागणां०स्तु।ॐनूः इत्यादित्रपास्ने०मधु३।अद्याद्य अमुकमासे अमुकपक्षे
अमुकतिथौ अमुकदिने यथावर्त्तमानेन०एवंगु०णौ।जातसुतस्यसर्वारिष्ट०

सर्वका०सर्वक्रु०र्थं।आयुषोभिवृद्ध्यर्थं।श्रीगणेशांबिकयोः०र्थं।आदित्यादिनव०
र्थं।आ०मातृकुलार्थंनांदीमुखानां प्रीत्यर्थंहिरण्यश्राद्धमहंकरिष्ये।पुण्याहं दी
र्घ०शिवा०सोम०अस्तु०दीर्घमा०पुष्टि०वृद्धिर०धनधान्य०इष्टसंपदस्तु।
अनिष्ट०यस्यापं०।द्विपद०दत्तहिताविदृष्टात्वा।जातसुतस्य।सर्वानि०हिर
ण्यदक्षिणा०यं नानागोत्रेभ्योदृदे।भगवत्यौगणेशांबिके आदित्यादिनवग्र
हा श्चप्रीयेतां।ऊलंजलो पूर्वोक्तिगुण०जातसुतस्य०गोत्रदेवताप्रीत्यर्थंयथादास्य
मानानिनालिकेरखंडानिगुडघृतसहितानिकस्मैचिद्ब्राह्मणाय अहंसंप्रददे।भ
गवत्यौगोत्रदेवताःप्रीयेतां।यथाशक्तिविशेषदानानि।ततोन्नूयसीसंकल्पः।अस्य

कर्मणः समृध्यर्थं न्यूनातिरिक्तपरिपूर्णार्थं यथोत्साहं भूयसीं दक्षिणां नानागोत्रेभ्यो द
द्या। करसंपुटं कृत्वा। दक्षिणाः पांतु। इत्यादि स्वस्तिनवंतो कृवंतु। ऊर्जं जले। अस्यक
र्मणो० स्तु। गृह्ये० उत्तरे० स्तु। मांगल्यं। आशीर्वादाश्च। जन्मपत्रिका श्रवणं॥ ॥इति
हिरण्यश्राद्धविधिः॥ ॥अथ जातकर्मादि॥ ॥आचमनादि सवितृवर्द्धइत्यंतं कृत्वा।
उक्तदेवताभ्यो जुष्टं गृह्णामि। ३। चरुपर्यग्निं कृत्वा। आसादनाद्याज्यभागांतं कृत्वा। जात
कर्मप्रायश्चित्तं। पुरस्तात्। ततः बालं तूष्णीं त्रिरवघ्राय। ॐ रुचाश्मा। इति। यजुषास ४७
मनिक्षि सामत्रो०। इति प्रतिमंत्रं निश्वासं बालस्योपरिष्टात्करोति। ततः घृतमधुनी एकी
कृत्य दध्युदकेन एकीकृत्य ततश्चत्वार्येकीकृत्य। ॐ प्रतेयज्ञामि० स्मिन् अमुकसगो

त्र देवदत्त अमुकशर्मन् इति मंत्रावृत्त्या हेम्नाचिः प्राशयेत्। दक्षिणे कर्णे ॐ वाकृ
इति जपति। ततः ॐ वाग्देवी० वाणीचीसलिलास्य यंत्रः इत्यनुमंत्रयेत्। ततः सुवर्णं
शात्रे सूत्रेण बध्वा। दक्षिणे हस्ते बध्नाति। उपरिष्टात्॥ ॥ततः नामकरणप्रायश्चि
त्तं। अवदान धर्मेण चरु होमः। ॐ प्रतिपदे स्वाहा। एवं अस्यां जातो भवति तां जन्म
तिथिं चतुर्थ्यंतां जुहुयात्। ॐ अग्नये स्वाहा। ॐ मृगशिरसे स्वाहा। एवं त्रीणि नक्षत्रा
णि सदेवतानि। यस्मिन् जातो भवति तन्नक्षत्रं मध्ये कर्त्तव्यं। पूर्वं देवतं पश्चान्नक्ष
त्रं सर्वत्र। ११। ॐ आयुष्टे० से स्वाहा। आयुर्दा० दिमं स्वाहा। त्वं सोमम० से स्वाहा।
एवं दशाचर्वाहुतीः कृत्वा ततः नागवल्ल्यादि पत्रे कुंकुमेन गोत्रशर्मयुक्तं कुमारना

मलिखित्वा। अस्यनामधेयांगस्यस्वस्तिवाचनकर्मणः प्रति॰च्चंस्वस्तिवाचकब्रा॰द्दृदे॥
ॐदक्षिणाःपांतु। स्वस्तिनवंतोक्रवंतु। ब्राह्मणइस्ते। अस्यनामधेयांगस्यस्वस्तिवाचनक
र्मणो॰स्तु॥ ॥ततःअन्नप्राशनकर्म॥ अन्नपतेन्नस्यनो॰देस्वाहा। यच्चिद्धितेपुरुषत्रा॰
मन्नेस्वाहा। महश्चिदग्नएनसो अन्तिकं॰योःस्वाहा। इदमन्न आयुषेवर्चसे॰सस्वाहा।
एन्निचतुर्मंत्रैःस्वाहाकारांतैश्चतस्त्र आहुतीर्कृत्वा। ततःअन्न आयूंषि॰नो। इतिवा
जमन्तिमंत्र्यस्योनापृथिवी॰पः। इत्यकृगयेषु दर्भेषुतपवेश्य। ॐभूः। ॐभुवः। ॐस्वः। इ ५८
तिप्रतिमंत्रंयथोक्रमन्नंहस्तेनैवप्राशयेत्। ततश्चरोःस्विष्टकृदादिशांत्यंतं॥ ॥अपचू
डाकर्म॥ ॥तत्रपूर्वेद्युःप्रथमराचौजटाधिवासनं॥ तद्दिनेवाप्रातःस्त्रियोबाजंतेनेना

न्यंजंति। शिरसोदृदिणेनागेतिस्त्रोजटाः उत्तरतोदे चबध्नंति। धूपायं इतिच। इत्यादौ
लोकाचारेन्त्ततेमांगल्यंवर्धापनंआशीर्वादाः। पुण्याहंदीर्घमायुरित्यादिसुशांतिर्नव
तु। अस्यजटाधिवासनकर्मणः प्र॰र्यदिरण्य॰दे। ॐदक्षिणाःपांतु॰। इत्यादिस्वस्ति
तवंतोक्रवंतु। अस्यजटाधिवासनकर्मणो॰स्तु। गृह्ण॰तु त्र॰स्तु। ततःप्रातरात्मुद
यिकंकृत्वा। व्रीहिपात्रादियथोक्तमासाद्य। आचमनादि आज्यनागांतंकृत्वा। चूडा
कर्मणःकालातिक्रमदोषनिवृत्त्यर्थंसर्वप्रायश्चित्तमहंकरिष्ये। यदिकालातिक्रमे।
ॐभूर्भुवःस्वःस्वाहा। अयाश्चाग्ने॰स्वाहा। पुरस्तात्। रक्तेबलावर्दचर्मण्युपवेश्य। प्राङ्मु
खंकरोति। संमृज्यघृतावरी॰मिं॰इत्यकृला॰ति। ॐआपउंदंतुजीवसे॰युषां। अस

कसगोत्र अमुका अमुकशर्मन्। इत्युक्त्वा त्रयाणां मध्ये। अपमं दक्षिणं केशपक्षं शी
तोष्णाभिर्मंत्रावृत्त्या त्रिरुन्दनक्ति। शलल्यो विजदाश्च त्वा। नवनीतेनाभ्यंजनं नौदि ओ
षधे त्रायस्वैनं। इति कुशमंतर्दधाति। केशान्कुशतरुणं चादर्शेन संस्पृश्य। तेजोसि॰
दिसी। इति लोहक्षुरमादत्ते। मंत्रः। येनावपत्सविता॰ रयमस्त्ववीरः। अमुकसगोत्र अ
मुका अमुकशर्म्मा। इति केशाग्राणि छिनत्ति। छिन्नान्केशान्गोमये निदध्यात्। ततः
आपउंदंत्वित्यादि कृत्वा द्वितीयं मध्यस्थं केशपक्षं छिनत्ति। तत एवं तृतीयं। पुण्ये इंद
र्घ। सुशांतिर्भवतु। तृतीयप्रवपननिमित्तं गां दक्षिणां। अहतं च वासस्त्र आचा
र्याय॰ दे। भगवत्यः कर्मांगदेवताः प्रीयंतां। दक्षिणाः पांत्वित्यादि। स्वस्त्ययनं कृत्वा पूर्व ४९

वत् उत्तरं केशपक्षं छिनत्ति। द्वितीयं च। प्रत्येकं आपउंदंत्वित्यादि। पूपकऽकार्यं।
॥इति चूडाकर्म समाप्तं॥ ॥अथोपवीतं॥ ॥पूर्वेद्युस्तद्दिने वा वर्णकाचारः॥ मातृस्था
पनं वसोर्द्धारां वृद्धिश्राद्धं कृत्वा। आचमनादि आज्यभागांतं कृत्वा। पुरस्तात्। अग्नेः प
श्चिमतः मुंडितं। स्नातं। सपवित्रकं। तिलकोपेतं। प्रत्यङ्मुखं ब्रह्मचारिणं तं तिष्ठंतं।
प्राङ्मुखस्तिष्ठन्गुरुरुपनयेत्। इयं दुरुक्तात्परिबाधमाना॰ यं। इति स्वयं पठित्वा। ए पश्चान्माणवकं पाठयित्वा
कवारं मेखलां परिवेष्टयति। एवं द्वितीयं। एवं तृतीयं। यावत्प्रवरं ग्रंथिकरणं। यज्ञोप
वीतमसि यज्ञस्य त्वा पवितेनोपनह्यामि। इति स्वयमुक्त्वा पाठयित्वा। पूर्वं तस्य द
क्षिणं हस्तं यज्ञोपवीतमध्ये प्रविश्य। ततो वामस्कंधे स्थापयति। एकमेवउपवीतं।

नैवद्वितीयं।मित्रस्यचक्षुर्धरुणंबलीयस्तेजोयशस्विस्थविरंसमिद्धं।अनाहन
स्यः वसनंजरिष्णुःपरीदंवाज्यजिनंदधेहं।इतिस्वयमुक्त्वा।तंप्रपाठ्य।तस्मा
जिनस्पर्शंकारयति।ततोमाणवकस्यात्मीयंचांजलिमुदकेनपूरयित्वा।को
नामासीतिमाणवकंपृच्छति।अमुकसगोत्रः अमुकाऽमुकशर्माऽहंभोः इ
तिमाणवकंवाचयति।समानार्षेयोभवान्ब्रूहि।इतिमाणवकंपृच्छति।ॐस
मानार्षेयोहंभोः।इतिवाचयति।सोप्येवंकथयति।ब्रह्मचारीभवान्ब्रूहि।इति ५०
पृच्छति।ब्रह्मचार्यहंभोः।इतिवाचयति।सोपिकथयति।ततःभूर्भुवःस्वः।इति
तस्यांजलावुदकांजलींस्त्रीनासिच्य।ततःमाणवकांजलिंदक्षिणोत्तरेण

हस्तसंपुटेनगृहीत्वा।ॐदेवस्यत्वा॰त्वामुपनयामि।अमुकसगोत्रअमुकाऽमुकश
र्मन्।ॐभगस्तेहस्त॰स्तव।अमुकसगोत्रअमुकाऽमुकशर्मन्।आसावहंचोभाव
ग्नभ्वस्तये।इतिसर्वंस्वयमेवजपति।ततःऐं॰ह्रीं॰श्रीं।इतिस्वयमुक्त्वा।तंवाचयित्वा।प्रद
क्षिणमावर्त्तयित्वाप्राङ्मुखंकरोति।ततःतस्यदक्षिणपक्षांतरेस्वंदक्षिणंहस्तंप्र
वेशयित्वा।ॐअरिष्यत॰सं।इतिउक्त्वा।दक्षिणेनप्रादेशेनहृदयदेशमभिमृशति।
उपस्पृश्य।ततःतूष्णींसव्यंपर्यावृत्य।आत्मनोऽभिमुखंकृत्वामाणवकहृदयेस्व
हस्तंऊर्ध्वांगुलिंस्थापयित्वा।ॐममव्रतेहृदयंतेद॰ह्मं।आन्वक्षिकस्यसावित्रस्य
ब्रह्मचर्यस्यअमुकसगोत्रअमुकाऽमुकशर्मन्।इतिजपति।ॐऐंह्रीमातृ॰श्रीं।तथैव

पर्यावृत्य प्राङ्मुखं कृत्वा। दक्षिणेन प्रादेशेन दक्षिणस्कंधमन्वारभ्य इति जपति। ब्रह्म
चार्यसि सं०धानात्। ततः स्वं आचार्यः कथयति। ब्रह्म०सि। असानि। इति माणवकः॥
मन्त्रा०हि। आदधाति। इति माणवकः। अग्नेरा०ना। असानि। इति माणवकः। कर्म०स।
करवाणि। इति माण०। मा दिवा सुषुप्थाः। न स्वपामि। इति मा०कः। वाचंय०धानात्। ततः
एषा ते०ड़िस्वाइ इति माणवकः। उपविष्टः। समिधं जुहोति। ततः सावित्रीप्रदाने। अग्ने
उत्तरतः प्राङ्मुख आचार्यः। प्राङ्मुखोन्यः। उपविशतः। माणवको नालिकेरं गृहीत्वा ५१
आचार्यं नमस्कारं कुर्यात्। ॐ अधीहि भोः इत्युक्त्वाचार्यः। ॐ सावित्रीं भोः अनुब्रू
हि। इत्येवं वाचयति। स कथयति। ततः ॐ तत्सवितुर्वरेण्यमित्येतां पच्छोर्धर्चशो नवानं

च पाठयेत्। अग्नेः पश्चिमतः प्राङ्मुखं ब्रह्मचारिणमुपवेश्य। आपो नाम स्थ०धत्त।
इति मंत्रावृत्यानिराचम्य। अग्नेः पश्चिमतः तिष्ठन् प्राङ्मुख आचार्यः तिष्ठते प्र
त्यङ्मुखाय ॐ स्वस्ति नो मिमीता०हि। इति दंडं प्रयच्छति। पुण्याहं०। सुशांतिर्नवित्र।
अस्य उपनयनकर्मणः प्रति०र्ध। गां दक्षिणां आचार्य०दे। दक्षिणाः पां०तु। ०स्वस्ति
न वं तो ब्रुवंतु। प्रदक्षिणमग्निं पर्याणीय भिक्षार्थमुपविशेत्। ॐ भवति भिक्षां दे
हि। इति भिक्षां याचेत्। ॐ स्वस्ति। इति गृहीत्वा। आचार्याय निवेदयेत्। भोः। सुभिक्षं भोः।
इत्याचार्य उक्त्वा। किंचित्तस्मै ददाति। मांगल्यं। आशीर्वादश्च। उपरिष्टात्॥ स्विष्ट
कृत्। मसकं। त्र्यसी। इत्यादिकर्मसमापनं। ततः संध्यासावित्र्येव कारयेत्। न

तो ब्रह्मचारिणः प्राणाहुतिः पूर्वं। अपोशानयुक्तं भोजनं। सायंसंध्या। अग्निकार्यं। सा
वित्र्येव। प्रातरपि तथैव। वाष्कुक्रिय व्रतात्प्राक् संध्या अग्निकार्यं च सावित्र्येव॥ ॥
शुक्रियव्रतात्प्राक् संध्यो दिनौ उद्दोष्टणिका कर्म। प्रातर्भुक्तवति ब्रह्मचारिणि अप
राह्णे ईशान्यां दिशि स्थंडिलं कृत्वा। आचमनाद्याज्यभागांतं कृत्वा पुरस्तात्॥४॥ ततः अ
ग्नाविंद्र आदित्ये विश्वे इति आचार्यः प्राङ्मुखस्तिष्ठन्। प्रत्यङ्मुखस्य ब्रह्मचारी तिष्ठ
तः। कर्णे पठति। चरितं तो इति माणवकः। ततः प्राङ्मुखं कृत्वा। अहतेन वाससा प्रदक्षि ५२
णं मुखं त्रिः परिवेष्टयति। यथोक्तं एकरात्रं समिदाधानं। ० निद्रा ० वसस्व। इति आदिश
ति। ततः उपरिष्टात्॥४॥ स्विष्टकृदादि शेषं तं। सायंकाले प्रातः अग्निकार्यं कृत्वा

मातृपूजापूर्वकं वसोर्धारा प्रातर्वृद्धिश्राद्धं॥ ॥ अथ शुक्रियकर्म॥ ॥ आचमनाद्या
ज्यभागांतं कृत्वा। पुरस्तात् उपनयनवत्। संवत्सरं कार्यं। मम व्रते ० महं। याव
त्कालस्य शुक्रियस्य ब्रह्मचर्यस्य। इति विशेषः। न सावित्री प्रदानं। समिदाधाना
नंतरं आपो नाम स्थेत्यादि सर्वप्रकृति व्रतं समापयेत्॥ ॥ ततः अनुवाचनं॥ शु
क्ले कि प्रातरग्निकार्यानंतरं तस्मादग्नेरुत्तरतः गोमयेनानुलिप्ते उदकधारसमर्प्य
आज्यवाक्यसदृशं कुंडं कृत्वा। ततो पुनरुत्तरतः आचार्यब्रह्मचारिणौ यथोक्तमुपविश
तः। अभिवादनादिके यथाविधि कृते आचार्य एवं वाचयति। सावित्रीं भो ३ अनुब्रूहि
इत्यादि उक्तप्रकारेण उक्तमंत्रपर्यंतं कृत्वा। ततः आचार्यः। अग्निमीळे पुरोहितमित्ये

तस्य नवर्चस्य सूक्तस्य मधुच्छंदा ऋषिः। अग्निर्देवता। गायत्री छंदः। अनुवाचने विनि
योगः। तस्येयं आद्या ऋक्। ततः अग्निमीळे० म। इति पाठयति। एवं सर्वेषां सूक्तानामा
द्यामृचं पाठयेत्। भोजनाद्याकृत्य यथाशक्ति। एवं समाम्नायां संहितायां तस्मिन्नह
नि ब्रह्मचारिणमुपवासः। न चासावुपविशेत्। ततः अपराह्णे। उदितधाना
न्तिन्द्रां देहि। इति त्रिष्टयवान् निःक्षित्वा उपले पले पनोद्धेरवनाद्यग्निस्थापन
माद्याराज्यभागांतं कृत्वा। एकस्क वेणधानानां अनिघारं कुर्यात्। सदसस्पतिमि
ति वर्गेण यथोक्तं जुहुयात्। तद्धेराचार्यं स्वस्तिवाचयेत्। अस्य अदुतधानाहो ५२
मांगस्य स्वस्तिवाचनकर्मणः प्रतिश्र्पं। इमां निष्क्रां आचार्याय तुभ्यमहं संप्रददे।

एवं प्रयोगः। ततः स्विष्टकृदादि समापनं। इत्यनुवाचनं अदुतधानाहोमकर्म
समाप्तं॥ ततः शाक्वरं। व्रातिकं। अपनिषदं। एतानि सांवत्सरिकानि व्रतानि यथो
क्तानि कृत्वा। समावर्त्तनं कार्यं। तद्यथाः पूर्वेद्युः कृतदातालिकां कृत्वा प्रातर्वृद्धि
श्राद्धं। आचमनाद्याज्यभागांतं कृत्वा पुरस्तात्॥ ततः आनडुहे चर्मण्युपवेश्य
यथोक्तं मुंडनं कारयित्वा। स्नातमाचांतं आर्द्रवाससं तं व्रीह्यादिभिर्यथोक्तैरुद्वर्त्य
आपोहिष्ठेति तिसृभिः प्रत्यृचं नवतिः कुंभैः स्नापयित्वा लौकिकं स्नापनं कार
यित्वा मौंजीं ऊर्ध्वं विभागेन छपकृत्य त्वा। अलंकृत्य युवं वस्त्राणि इत्यृचा वाससी प
रिधाय। तिलकं कारयित्वा। पूर्वमुपवीतं त्यक्त्वा मौंजीपवीते दंडं जले क्षिपेत्॥

आयुष्यमितिसुवर्णंबध्नाति। इत्यादिसर्वंयथोक्तंकृत्वा। रथमास्थायपुनर्गृहमा
गते। मांगल्यं आशीर्वादाश्च कृत्वा। इत उपरिष्टात्।४। स्विष्टकृदादिशांत्यंतं। ततो
यज्ञोपवीतं दंडादि च अप्सु जुहुयात्॥ ॥इतिसमावर्त्तनंसमाप्तं॥ ॥इतियज्ञो
पवीतविधिःसमाप्तः॥ ॥श्रीगणेशायनमः॥ ॥गृहकर्मलिख्यते॥ अस्यांभूमौगृ
हंकर्तुंवांछति॥ अथवानिःपन्नेगृहेपि। उदुंबरशाखयात्रिःपरिलिखेत्। इडान्ना
द्याय० मि। इतिमंत्रेण। गृहमध्येस्थंडिलंकृत्वा। आचमनादिआज्यभागांतंकृत्वा। ५४
ॐकोसिकस्यासि० २। अस्यांदेवानां०तरेणस्वाहा।२। इतिजुहोति। स्विष्टकृदा
दिशेषंसमापनीयं। ततोगृहंसूत्रयित्वापूर्वस्यांदिशिद्वारंकल्पयित्वा। चौगर्तैःखा

नयेत्। ततोदक्षिणस्यांदिशिद्वारप्रदेशेएवमेव। पश्चिमायांदिशिएवमेव। उत्त
रस्यांदिशिएवमेव। मध्येएकगर्तः। नवगर्तान्खानयित्वा। तेषुनवगर्तेषुउदकं
सर्पिमिश्रंप्रक्षिप्य। ततःॐइमांविमिन्वे० नित्यवत्सा। इतिउदुंबरशाखांघृतेनाक्तां
पूर्वस्यांदिशिदक्षिणेद्वारेगर्तेनिदधाति। ततःइमामुच्छ्रयामि०पाकवत्सा। इतिपू
र्वस्यांदिशिउत्तरेगर्तेद्वितीयामुदुंबरशाखांघृताक्तांनिखनंति। एवमेतान्यामे
वमंत्रान्यांचअष्टुदिक्षुउदुंबरशाखेघृताक्तेद्वेद्वेपूर्ववत्तेष्वेवगर्तेषुनिदधाति।
एवमेवमष्टौनिखायततःइमामइमस्य० आस्पंदंतांधेनवोनित्यवत्सा। इति
स्थूणांगराजमंडूकांमध्येवर्त्तमानांमहतींत्वारइमांस्थूणामुच्छ्रयतिततःएवंकु

मारइत्यारन्यहइतिस्तंभनायेनिपर्यंतंसकलंमंत्रजातमुक्त्वास्थूणराजसंज्ञकाए
नामहतीस्थूणामभिमृशेत्।ततोयथाविभवंगृहंकारयित्वा।ॐसत्यंचेतिमंत्रेणपू
र्वद्वारेदक्षिणांद्वारशाखांअभिमृशेत्।श्रद्धांचेतिउत्तरांअभिमृशेत्॥ॐयज्ञश्च।इ
तिमंत्रेणदक्षिणेद्वारेपश्चिमांद्वारशाखामभिमृशेत्।ॐदक्षिणाच।इतिपूर्वां।ॐब
लंच।इतिमंत्रेणपश्चिमेद्वारे।दक्षिणांद्वारशाखां।अन्नंच।इतिउत्तरां।ॐब्रह्मच।
इतिउत्तरद्वारेपश्चिमांशाखामभिमृशेत्।ॐक्षत्रंच।इतिपूर्वां।ततश्चोस्थूणाधर्म
स्थूणाराजः।इतिगृहमध्यएवास्थूणाराजमभिमृशेत्।ॐअहोरात्रे।इतिद्वार ५५
फलके।ॐसंवत्सरोपिधानं।इतिद्वारफलापादंअभिमृशेत्।उच्छ्रासमुद्रो॰न्तो।इ

तिअत्यक्तमरमानंस्तूपस्या॰धस्तान्निखनेत्॥अथवास्तोष्पतिकर्म॥संध्यातर्प
णंविश्वेदेवाः।तत्रमातृपूजनंवृद्धिश्राद्धं।वसोर्धारा।आचमनादि।ॐअग्निं
दक्षामि॰।ददा।इत्यग्निंप्रणीयप्रागग्रेषुनवेषूदकुंभंनवंप्रति॰अग्नेरुत्तरतः
प्रतिष्ठाप्य।ॐअरिष्टाअस्माकंवीरा॰नं।इत्यभिमंत्र्यपरिसमूहनादिआज्यभा
गांतंकृत्वा।पूर्वाहुतिस्वआज्याहुतीर्जुहोति।मंत्रायथा।ॐअभित्वाशूरनोनुमो
दुग्धाइवधेनवः।ईशानमस्यजगतःस्वर्दृशमीशानमिंद्रतस्थुषःस्वाहा।ॐईशा
नमिंद्रतस्थुषोनत्वावाँअन्योदिव्योनपार्थिवः।नजातोनजनिष्यतस्वाहा।ॐन
जातोनजनिष्यतेअश्वायंतोमघवन्निंद्रवाजिनः।गव्यंतस्त्वाहवामहे।स्वाहा।

यदि इष्टं न करोति तर्हि स्विष्टकृदादि कर्मापवर्गान्तं कर्त्तव्यं। यदि एकतंत्रेण करो
ति तर्हि बर्हिरास्तरणादिकं आसाद्य आचमनादि सर्विभव इत्यं तं कृत्वा। वास्तोष्पति
चरुयइ एणं कृत्वा। चरोरासादनादि आज्यभागांतं कृत्वा। अग्निर्त्वेत्यादिमंत्रैः पू
र्वोक्तप्राधान्यास्तिस्र आज्याहुतीर्हुत्वा। कयानश्चित्र इत्यादिभिर्मध्यंदिनप्राधा
न्यनिस्त्रीकृत्वा। त्वामिद्धीत्यादिभिरपराह्णप्राधान्यं च कृत्वा। ततो नूस्वा इत्यादि
नवमंत्रैर्नवचर्वाहुतीश्चतुर्गृहीतधर्मेण कृत्वा। सो विष्टकृतो दशमीमपि स्थाली
पाकस्यैव कृत्वा सप्तकादि शेषं समापनीयं॥ तस्मिन्नेवाग्नौ दिने तत्र परिसमूह ५६
नादि आज्यभागांतं कृत्वा। कयानश्चित्र आभुवदित्यादिभिस्तिस्रिभिर्मंत्रैः सप्त

भिस्तिस्र आज्याहुतीर्जुहोति। ततः स्विष्टकृदादि कर्मापवर्गांतं दक्षिणास
हितं कर्त्तव्यं॥ ततः अपराह्णे आचमनादि आज्यभागांतं कृत्वा। ॐ त्वामिद्धि ह
वामहे साता वाजस्य कारवः। त्वां वृत्रेष्विंद्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः स्वाहा।
ॐ त्वां काष्ठास्वर्वतः सत्वं श्चित्र वज्रहस्त धृष्णुया। महः स्तवानो अद्रिवः स्वाहा।
ॐ महः स्तवानो अद्रिवो गामश्वं रथ्यमिंद्र संकिर। सत्रा वाजं न जिग्युषे स्वाहा।
एभिर्मंत्रैस्तिस्र आज्याहुतीर्हुत्वा। स्विष्टकृत्सप्तकादि तंत्रशेषं समापयेत्।
ततो रात्रौ आचमनादि सर्विभर्वइत्यंतं कृत्वा उवर्यइ एणं। ॐ वास्तोष्पते यजुष्टं गृ
ह्णामि। इचतुर्पंथिल्ली। ॐ वाः मासादयामि। ॐ वास्तोष्वत्वा जुष्टं प्रोक्षामि। समि

दादिप्रोक्षणशेषोदकं ब्राह्मणास्तु मुक्ता॥ त्रिःप्रक्षालनं॥ अधिश्रयणादि आज्य
नागां तं कृत्वा॥ चतुर्गृहीतं चरुत्वा दश च वकिति जुहुयात्॥ मंत्राय पा॥ ॐ भूः
स्वाहा॥ ॐ भुवः स्वाहा॥ ॐ स्वः स्वाहा॥ ॐ भूर्भुवः स्वः स्वाहा॥ वास्तोष्पते प्रतिजानीहि
॥अ॥ अमीव स्वाहा॥ वास्तोष्पते०॥ वास्तोष्पात ध्रुवा०॥ सो विष्टक्कती दशमी॥ तोतोय
पाविदिति वास्तुदेवता॥ ५५॥ प्रत्येकं चंदनादि॥ निवेद्य॥ तांबूलादि पूजायपा
विहिता॥ ततः शोभनादि सुमुहूर्त्ते सुलग्ने नूतनगृहे प्रवेशं कुर्यात्॥ ज्येष्ठं पु ५१
त्रमादाय धान्योदकेन सहितः प्रवेशेत्॥ मंत्रस्तु॥ इंद्रस्य गृहाः० किंचास्मि तन॥
प्रवेशसमये पुण्याह तूर्यादि वादित्रगानघोषान्वितम ईति॥ ततो गृहं प्रविश्य वा

त्तव षडब्द प्रायश्चित्ताचरणे अधिकारोस्ति॥ ब्राह्मणी स्त्री यदि प्रायश्चित्त कर्त्री अ
ब्द प्रायश्चित्ताचरणे अधिकारोस्ति॥ शूद्र यजमानं एवं त्र्यब्दं॥ शूद्री स्त्री यदि प्रा
यश्चित्त कर्त्री तदा तव सार्द्धाब्द प्रायश्चित्ताधिकारोस्ति॥ ब्राह्मणस्य षडब्द प्रायश्चि ६
त्ताशक्तो॥ त्र्यब्दं॥ सार्द्धाब्दं वा॥ पश्चात् यजमानः॥ मम एकाब्द प्रायश्चित्ते शक्तिरस्ति॥
एवं त्र्यब्द प्रायश्चित्ताचरणे॥ एवं षडब्द प्रायश्चित्ताचरणे॥ यदि न स्त्रतं चेत्त ईव
पनं॥ दशविधस्नानं॥ भस्म मृत्तिका२ गोमय३ गोमूत्र४ क्षीर५ दधि६ घृत७ ति
ल८ आमलक९ कुशोदक१० अपवा गंगोदकेन सकलस्नानां ते तिलकं॥ अ
ष्टदलोपरि कलशस्थापनं॥ मंत्रैः॥ मत्स्येश्वरस्य मूर्त्ति प्रतिष्ठा॥ पूजा॥ षोडशान्निरु

पचारैः। पंचोपचारपूजा॥ ततो ब्राह्मणस्य अर्चनं। अर्चसंकल्पः। यथापादत्तं गंधा
द्यर्चनं आग्नेयो हस्तकर्णयोर्मुद्रिके गोमिथुनद्रव्यं च। तस्य ब्राह्मणाय तुभ्यम
हं संप्रददे। आचमनं। यथादास्यामानं तृप्तिपर्यंतं भोजनं तस्य ब्राह्मणाय तुभ्यम
हं संप्रददे। सुप्रोक्षितादि ब्राह्मणहस्ते जलपात्रे च। दीर्घमायुरित्यादि सुशांति
र्भवतु। विष्णोरुपरि प्रायश्चित्तसंकल्पः। अद्यश्री देशे च मम जन्मप्रभृति इदं दिनं या
वत्त्वा मनःकायकृतानां बुद्धिपूर्वाऽबुद्धिपूर्वाणां। कलदन्यासविषयाणां महापा
तकादि वर्जितानां सर्वेषां पापानां शोधनार्थे षडब्द प्रायश्चित्ते अशीत्यधिकशते ६२
कप्राजापत्यं १८० प्रति प्राजापत्यं द्वादश १२ द्वादश ब्राह्मण भोजन परिगणनया

षष्ठ्यधिकमेकविंशतिसंख्याकानां तन्निष्क्रये मनसि परिकल्पितं द्रव्यं तस्य ब्रा
ह्मणाय भगवते मत्स्येशाय मत्यास्मद्दिताय तुभ्यमहं संप्रददे। सकलद्रव्यं विष्णो
रुपरि समर्पणं। ततः संकल्पित द्रव्यमध्यात् तस्य ब्राह्मणस्य अंशार्पणं। द्रव्यं त
त्सीदलंती पादिकं च हस्ते गृहीत्वा। मम सर्वपापक्षयार्थं संकल्पित प्रायश्चित्तम
ध्यात् एकाब्दस्य निष्क्रय द्रव्यमिदं। अथवा पंचदश प्राजापत्यानां प्रत्याम्नायभू
तमिदं द्रव्यं अमुकसगोत्राय अमुका अमुकशर्मणे अमुकवेदाध्यायिने ब्रा
ह्मणाय तुभ्यं। अमुकसगोत्रः अमुका अमुकशर्माहं संप्रददे। भगवान्
पापहा विष्णुः प्रीयतां। पुनः सेत्येश्वरस्य पंचोपचारपूजा। द्वितीयायां गोमिथुन

द्रव्यार्पणं। मम चीर्णप्रायश्चित्तस्य निःपापवचनप्राप्त्यर्थं इदं गोमिथुननिष्क्रतिरू
पं द्रव्यं सत्पोपरिष्टब्राह्मणाय तुभ्यमहं संप्रददे। भगवान् पापहा विष्णुः प्रीयतां।
अनेन षडब्दप्रायश्चित्ताचरणेन च गोत्रः अमुकशर्माहं निःपापो भूयासं। त्वं
निःपापो भूयात्। इति ब्राह्मणा कथ्यते। स्त्रीश्चेत्। अनेन त्र्यब्दप्रायश्चित्ताचरणे
न गोत्रः। अमुकनामाहं निःपापो भूयासं। त्वं निःपापो भूया। इति विप्रः। अस्य
प्रायश्चित्ताचरणकर्मणो यन्न्यूनातिरिक्तं तत्सर्वं ब्राह्मणानां प्रसादात् तीर्थराज ६३
प्रसादात् तीर्थप्रसादात् सत्येश्वरस्य प्रसादात् सर्वं परिपूर्णमस्तु। मम त्रिषु
स्थलीषु यात्रास्तु अधिकारप्राप्तिरस्तु अथवा आतुरे वितरण्यादि दानेऽ

धिकारप्राप्तिरस्तु। सर्वपापक्षयोस्तु॥ श्रीगणेशाय नमः॥ श्रीविष्णवे नमः॥ आतुर
काले वितरण्यादिदानसंकल्पः। तस्य प्रकारः। आदौ विष्णुपूजा। यथावकाशं। तत्र
वितरण्यादिदानप्रारंभनिमित्तं विष्णुपूजनमहं करिष्ये। इति प्रयोगः। धूपदीपनै
वेद्यांतं पूजा। वितरणीदानप्रतिगृहीतृब्राह्मण एतत्ते पाद्यं। एषवोऽर्घः। पूजा। पा
दप्रक्षालनं आचमनं। आत्मनः पादप्रक्षालनं। आचमनं। गृहं गत्वा प्राग् उद० ॐ
विष्णुः३ अपवित्रः० इदं विष्णु० सप्तव्याहृ० इत्यादि देशकाल० दस्तु। दृष्टि० च। वित
रण्यादिदानोपहाराणां पवित्रताऽस्तु। ॐ भूः। ॐ भुवः। इत्यादि उपास्मै० मधु ३ अघ
श्री इत्यादि देशे च। अमुकस्य आतुरकाल निमित्तं सर्वानिष्टपरिहारार्थं सर्वपाप

द्वयार्थशास्त्रोक्तफलार्थं। वैतरणीदानमहं करिष्ये। ब्राह्मणस्य पूजा। यथादत्तं॰
मुद्रिकाद्युपायनानि तन्निक्षिपेत् इदं द्रव्यं वैतरणीदानप्रतिग्रहीत्रे ब्राह्मणाय तुभ्य
महं संप्रददे। सवत्सा गोश्च पूजा। अर्चनविधेः परिपूर्णतास्तु। आचमनं। अपहृता॰
अहन्नमीमदंत च्छदकोः। यथादास्यमानेत्र त्रिपर्यंते जोजनं वैतरणीदानप्रतिग्रही
त्रे ब्राह्मणाय तुभ्यमहं संप्रददे। ब्राह्मणहस्ते सुप्रोक्षितमस्तु। दीर्घमायुरस्तु। इ
त्यादि। सुशांतिरस्तु। उत्तराभिमुखो ब्राह्मणः। दाता पूर्वाभिमुखः। दक्षिणं ज्ञान्वाच्य
हस्तान् गृहीत्वा। अद्येत्यादि प्रयोगमुच्चार्य। अमुकसगोत्राय अमुकशर्मणे अमु ६४
कवेदाध्यायिने ब्राह्मणाय तुभ्यं अमुकसगोत्रः अमुकनामा अमुकशर्मा अहं वैतर

णीसंज्ञिकां गां सवत्सां गंधाद्यर्चितां रुद्रदैवतां सुवर्णशृंगीं रजतखुरां ताम्रपृष्ठां
कांस्यदोहनां सवस्त्रयुगच्छन्नां व्रीह्यादि सप्तधान्यसहितां द्रोणपरिमितकर्पा
सोपरि ताम्रभाजनस्थित लोहदंडधारि महिषारूढ हैम धर्मराजमूर्त्तिसहितां प
द्मसूत्रवेष्टितद्रुदंडनौकास्थितां यमद्वारे वर्त्तमानां शतयोजनविस्तीर्णां अगाधां पूय
शोणिततोयां मांसकर्दमां अधोमुखैर्वज्रतुंडैर्नानाविधैः कृमिभिः संकुलां अ
न्यैश्च मर्मभेदिभिर्नक्रमकरशिशुमारग्राहादिभिर्जलचरैः प्राणिभिः संकीर्णां
दृष्टमात्रभयावहां एवंविधां वैतरणीधेनुसंज्ञिकां नदीं तर्तुकामः संप्रददे। नम
मा गोपुच्छकुशान्वितजलसहितं विप्रहस्ते दद्यात्। ततो दक्षिणासंकल्पः। पूर्वो

क्तगुणविशिष्टेपुण्येकालेदेशेचअमुकसगोत्रःअमुकाअमुकशर्माहंअ
स्यावैतरणीदानपरिपूर्णार्थमिदंसुवर्णंअग्निदैवतंगंधाद्यर्चितंदक्षिणांसंप्रद
दे।नमम।अनुमंत्रणं।यमद्वारेमहाघोरेयासावैतरणीनदी।तांतर्तुंगांददाम्येतां
कृष्णांवैतरणींचगां॥विष्णुरूपद्विजश्रेष्ठभूदेवपंक्तिपावनः।सदक्षिणामयादत्ता
कृष्णांवैतरणींनमः।ब्राह्मणंप्रणम्य।सर्वेषांप्रदक्षिणांकुर्यात्।पुच्छंगृहीत्वाब्राह्म
णेनगोआकर्षयेत्।तत्रमंत्रः।धेनुकेत्वंप्रतीक्षस्वयमद्वारेमहाभये।उत्तितीर्षुरहं ६५
देवीवैतरण्यैनमोनमः।ततोभूयसीदक्षिणा।यजमानमांगल्यकरणं।गवादिस
र्वमुपहारजातंब्राह्मणस्यगृहंनयेत्॥ ॥इतिवैतरणीदानं॥अथकृष्णधेनुदानं॥

विष्णुपूजा।पादप्रक्षालनं।आचमनंप्राणायामः॥अद्येत्यादिप्रयुज्यकृष्णधे
नुदानमहंकरिष्ये।ब्राह्मणस्यपूजा।भोजनसंकल्पः।सुप्रोक्षितादि।अद्यादि
कृष्णधेनुसंज्ञिकांगांसवत्सांगंधाद्यर्चितांरुद्रदैवतांसुवर्णशृंगींराजतखुरांखु
ताम्रपृष्ठींकांस्यदोहनींदेवर्षिकंपितृसंबंधीऋणत्रयपाकरणार्थंतुभ्यमहंसं
प्रददे।इतिकृष्णधेनुदानं॥तिलालोहहिरण्यंचकार्पासोलवणंतथा।सप्तधान्यं
क्षितिर्गावएकैकंपावनंस्मृतं।अद्येत्यादिपूर्ववत्।तिलादीन्यष्टौमहादानानिना
नादैवतानिगंधाद्यर्चितानिनानाफलदातृणीतत्तद्दानफलावाप्त्यर्थंकस्मैकस्मै
चिद्ब्राह्मणायाहंसंप्रददे।नमम।इत्यष्टमहादानविधिः।पूर्वोक्तगुणविशिष्टपु

ण्येकाले देशे च अन्नादकं सुवर्णं चिरजतं वस्त्रोपानहौ। कमंडलुछत्रं यष्टिरग्नि
कालोऽदंडः। तांबूलं चंदनं पुष्पाण्यादर्शः। एतान्युपदानानि नानादेवतानि गं
धाद्यर्चितानि कस्मै कस्मैचिद्ब्राह्मणायाहं संप्रददे। न मम। इति षोडशोपदानवि
धिः। पूर्वोक्तगुणविशिष्टे पुण्ये काले देशे च इदं ताम्रपात्रं तिलपूरितं रुद्रदेवतं
यथोपस्करसहितं गंधपुष्पधूपाद्यर्चितं सदक्षिणं शास्त्रोक्तपुण्यफलावाप्त्य
र्थं कस्मैचिद्ब्राह्मणायाहं संप्रददे। न मम। इति तिलपात्रदानं॥ अथ घृतपात्रं॥
पूर्वोक्त°च। इदं कांस्यपात्रं घृतपूरितं सूर्यदैवतं गंधाद्यर्चितं सदक्षिणं कस्मै ६६
चिद्ब्रा°ददे। न मम। इति घृतपात्रं। अथ पददानं। पूर्वोक्त°च। इदं आसनादिदशविधं

पदं यथोपस्करसहितं सदक्षिणं शास्त्रोक्तफलावाप्त्यर्थं कस्मै°ददे। न मम। इति पददा
नं॥ स्त्री चेत्। इमां वंशपात्रीं कुंकुमादियथोपस्करसहितं वस्त्रसुवर्णाभरणादि
सहितां इह जन्मनि जन्मांतरे च अखंडसौभाग्यप्राप्त्यर्थं अहं संप्रददे। न मम। इ
ति वंशपात्रीदानं॥ इति वैतरण्यादिदानानि। भूयसी संकल्पः। अमीषां दानानां न्यू
नातिरिक्तं परिपूर्णार्थं हिरण्यदक्षिणां निष्क्रययथापादास्यमानं द्रव्यं नानागोत्रेभ्यो
ब्राह्मणेभ्यो अहं संप्रददे॥ इति भूयसी संकल्पः॥ इति वैतरण्यादिदानसंकल्प
विधिः समाप्तः॥ अथ मरणानंतरं षट्पिंडास्तेषां क्रमः। उत्क्रांतौ द्वारदेशे विश्रां
तौ चितास्थाने शबहस्ते संचयने। तेषां विधिः॥ आचमनं। प्राणायामः। विष्णुः२ अ

पवित्रः पवित्रो वा सन्नव्याधा० देवतान्योम ह्यायोगिन्य एव च। नमः। ॐ श्राद्धभूमौ
गयायां स्वयमेव जनार्दनः। तं ध्यात्वा० देशकालपात्रद्रव्यश्रद्धासंपत्। अपसव्यं।
दक्षिणे० उत्क्रांत्यादि पंच पिंडैः पक्षाराणां पवित्रता। भूः। भुवः। स्वः। महः। जनः। तपः।
सत्यं। तत्सवितुर्व० मधुवाता० मधु३। अद्यादि मासे पक्षे तिथौ दिने यथा वर्त्तमान
नक्ष० समवाये। एवं गुण विशिष्टायां पुण्यतिथौ। अमुकतीर्थे देवब्राह्मणानां च
सन्निधौ एवं गुण विशिष्टे पुण्ये काले देशे च। अमुकसगोत्रस्य अमुकप्रेतस्य
शास्त्रोक्तफलावाप्त्यर्थं उत्क्रांत्यादि पंच पिंडदानानि एकतंत्रेण अहं करिष्ये। पा ६७
त्रे जपः। स्मरणं। अमुकसगोत्र अमुक प्रेत अवनेनिक्ष्व। ५। अमुकसगोत्र अमुक

प्रेत ते। ५। अस्य उत्क्रांत्या पंच पिंडदान कर्मणि यन्न्यू० सर्वं परिपूर्णं। एभिः
पिंडदानैः गोत्रस्य प्रेतस्य दहनयोग्यता प्राप्तिः। शास्त्रोक्तफलावाप्तिः। नत्रंक
र्मन्नि० रिति पिंडत्रयविसर्जनं। ततः। अपेत वीत वि सर्पतातो स्मा एतं पितरो लोक
मक्रमन्। अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै। अनेन मंत्रेण
पलाशशाखया चितास्थानं विमृज्य। पंचभूसंस्कारान् कृत्वा अग्निं संस्थाप्य। श
वं उत्तानं चितौ निपात्य। अयं वै त्वमस्माद्‌यं तेयोनिस्त्वमस्य योनि। जातवेदो
वहस्वैनं सुकृतां यत्र लोकः। अयं वै त्वामजनयदयं त्वदधिजायतां। गोत्रः प्रेतः स्व
र्गाय लोकाय स्वाहा। प्रदीप्ते होमेन मन्त्र इति दश ऋचो जपेत्। स व्याहृतोऽनवेक्ष

माणाःप्रागुदंचःप्रक्रामंति।पुरोहितःअन्योवामृत्योःपदमितिद्वाभ्यामृग्भ्यां
प्रक्रामतःसपिंडान्।अनुमंत्रयते।मृत्योःपदंयोपयंतोयदैतद्राघीयआयुः
प्रतरंदधानाः।आप्यायमानाःप्रजयाधनेनशुद्धाःपूताभवतयज्ञियासः।
इमेजीवाविमृतैरावदृत्रन्नभूद्भद्रादेवहूतिर्नोअद्य।प्रांचोअगामनृतये
हसायद्राघीयआयुःप्रतरंदधानाः।आपोहिष्ठाद्यृचगर्ग।सनाचसोमवर्गइ
तिउदकंस्पृशंति।ततोमज्जंति।ततःअमुकसगोत्रअमुकप्रेततिलोदकांजलि ६८
स्तेइत्येकमुदकांजलिंदद्यात्।आपोअस्मान्मातरःशुंधयंतुघृतेननोघृत
प्वःपुनंतु।विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरापूतएमि।अनेनमंत्रे

णबहिःसंनिःसरंति।ततोवस्त्रंपरिधाय।तच्चक्षुरित्यृचाआदित्यमुपस्था
य।ततोस्थिसंचयनं।अयुग्मासुरात्रिषु।अपसव्यं।यंत्वमग्नेसमदहस्तमु
निर्वापयापुनः।कियांम्ब्वत्ररोहतुपाकदूर्वाव्यल्कशा।शीतिकेशीतिकावतिह्ला
दिकेह्लादिकावति।मंडूक्याउसुसंगमइमंस्वग्निंहर्षय।आभ्यांमंत्राभ्यांस
क्षीरेणोदकेनास्थीनिसंसिच्यपलाशपटेकृत्यमृन्मयेडकंनेशैवालसंयुक्ता
निअस्थीनिमुक्त्वा।उत्तेस्तभ्नामिपृथिवींत्वत्परीमंलोगंनिदधन्मोअहंवि
रिषं।एतांस्थूणांपितरोधारयंतु।तत्रायमःसादनातेमिनोतु।इतिलोष्ठेनापि
धाय।ॐकएहं।उच्छ्वंचस्वपृथिवीमानिबाधथाःसूपायनास्मैभवसूपवंचना।

मातापुत्रंयथासिचाभ्येनंभूमऊर्णुहि।अनेनमंत्रेणखातेनिखाय।उच्छ्वं
चमानापृथिवीसुतिष्ठतुसहस्त्रंमितउपहिश्रयंतां।तेगृहासोघृतश्चुतोभवंतु
विश्वाहास्मैशरणाःसंत्वत्र।अनेनमंत्रेणश्मशानेप्रवेश्यअवस्थापयेत्।खातंमृ
दापूरयेत्।ततःपिंडदानं।आचमनंप्राणायामः।अपवित्रः०स्मरे।सप्तव्याधा
इत्यादि।अपसव्यं।दृष्टिनि०च्छ।अस्थिसंचयनपिंडोपहाराणांपवित्रता।नूः०
सत्यं।तत्स०मधुवाता०मधु३अर्घादि।एवंगुणविशिष्टायांपुण्यतिथौगोत्रस्य ६९
प्रेतस्यशास्त्रोक्त०अस्थिसंचयनपिंडदानमहंकरिष्ये।पात्रेजपः।स्तरणं।अव
नेजनं।पिंडदानं।पुनःप्रत्यवनेजनं।पूजा।नैवेद्यं।अचाछादन०नैवेद्यःपिं

डस्यार्चनविधेःपरिपूर्णता।अनेनपिंडदानेनगोत्रस्यप्रेतस्यपरलोकेशा
स्त्रोक्त०प्तिः।न्यूना०र्णं।तृतीयदिवसकर्मयोग्यताप्राप्तिः।दशाहकर्मयोग्य
ताप्राप्तिः।नत्रंकर्णंप्तिरितिविसर्जनं॥तृतीयदिवसे० संध्याकालेत्रिषुमृन्म
यपात्रेषुअश्वत्थसमीपेआकाशेदुग्धोदकदानविधिः।आचमनं।प्राणा
यामः।अपवित्रः०रे।सप्तव्या०श्रद्धासंपत्।अपसव्यं।दृष्टि०दुग्धोदकदानो
पहाराणांपवित्रता।नूः०मधु३।अर्घादिमासेपक्षेतिथौदिनेगोत्रस्यअमुक
प्रेतस्यशास्त्रोक्तफलावाप्त्यर्थंदुग्धोदकदानमहंकरिष्ये।गोत्रप्रेतआकाशे
दुग्धंपिब।एवंत्रिषुपात्रेषु।गोत्रप्रेतआकाशेउदकंपिब।एवंत्रिषुपात्रेषु।

अस्य दुग्धोदान कर्मणो॰ र्णं। अनेन दुग्धोदकदानेन गोत्रस्य प्रेतस्य शास्त्रो
क्त फलावाप्तिः॥ न्यूनातिरिक्तं॰ र्णं॥ ॥त्याज्य वस्त्र परिधानं॥ आचमनं प्राणा
यामः॥ विष्णुः ॐ अपवित्र॰रे। मम व्याधा॰ देवताभ्यो मह्यायो गिभ्य एव च।
नमः ॐ॥ श्राद्धं॰ गयायां स्वयमेव॰ देशकालपात्र द्रव्यश्रद्धासंपत्। अपस
व्यं। दृष्टि॰ प्रेतश्राद्धोप॰ता। प्रयोगः देशे च। अमुकसगोत्रस्य प्रेतस्य मूर्द्धादि
देशावयवप्राप्त्यर्थं प्रथमाह्न पिंडोदकदानम हं करिष्ये। सव्यं। विष्णुपूजा। पा १०
त्रे जपः। पिंडद्रव्याणि। पिष्टं। दुग्धं। घृतं। मधु। तिल। उदकं। धूप। दीप। अवनेज
नं पिंडदानं पुनः प्रत्यवनेजनं। पूजा। नैवेद्यं। सव्यं। आचमनं प्राणायामः। स्तु

त्रोद्वितं। शिवा आपः। सौमनस्यं। अक्षतं च। अपसव्यं। आमान्न संकल्पः। गो
त्र प्रेत तिलोदकांजलिस्ते। एकांजलिं पिंडोपरि दद्यात्। ततः प्रवृत्ति दशाह
पर्यंतं द्वे द्वे अधिके अंजली दद्यात्। एवं॰॰ शतं भवति। अस्य पिंडोदकदा
न कर्मणो॰ परिपूर्णं॥ अनेन पिंडोदकदानेन गोत्रस्य प्रेतस्य मूर्द्धादि देहा
वयवप्राप्तिः। द्वितीयाह्न पिंडोदकदानयोग्यताप्राप्तिः। न्यूनातिरिक्तं परिपूर्णं।
एवं दशाह पर्यंतं। दशमे दिने पिंडदानानंतरं तैल कल्को स्नोदकदानयोग्य
ताप्राप्तिः। ततः स्नानं कृत्वा॥ दशाकर्षं कुर्यात्। रेषा॰ मुखं अंग॰ बिस्ती॰ वितति
संबंः तत्प्रकारः। आचमनं प्राणायामः। विष्णुः। ॐ अपवित्र॰रे। मम व्याधा॰ सं

पतु।दृष्टि॰तैलकल्कोष्णोदकदानांपञ्चराणांपवित्रता।नृः॰सत्यं।नम्र॰
यातु।मधुवाता॰मधु३।अद्यादिगोत्रस्यप्रेतस्यमलापनुत्यर्थंशुचित्वप्राप्त्य
र्थंशास्त्रोक्त॰दशकर्षतैलकल्कोष्णोदकदानमहंकरिष्ये।गोत्रप्रेततैलेने
नांक्ष्व।एवंदश।गोत्रप्रेतकल्केनोद्वर्तय।एवंदशसु।गोत्रप्रेतउष्णोदकेनस्ना
हि।एवंदशसु।अस्यतैलकल्कोष्णोदकदानक॰परिपूर्णं।।अनेनतैलकल्को
ष्णोदकदानेनगोत्रस्यप्रेतस्यमलापनुत्तिः।शुचित्वप्राप्तिः।।शास्त्रोक्त॰प्तिः। ७१
एकादशाहकर्मयोग्यताप्राप्तिः।।न्यूना॰र्णं।।ततोवस्त्रत्यागः।।वपनंस्नानं।। ।।
इतिदशाहपिंडदानविधिः।। ।।एकादशाहेतीर्थंगत्वास्नानं।स्नानांगतर्प

णं।संध्यातर्पणं।आचमनं।प्राणायामः।प्रयोगंकृत्वा।विष्णोःषोडशोपचारपू
जा।तद्विधिः।अद्यादिप्रयोगः।पुण्येकालेदेशेचगोत्रस्यप्रेतस्यप्रेतत्वविमु
क्त्यर्थंएकादशाहकर्मप्रारंभनिमित्तंविष्णोःषोडशभिरुपचारैःपूजनम
हंकरिष्ये।वामहस्तेदक्षिणेइत्यादिन्यासः।पूजा।जपः।भोजनसंकल्पः।
तानादेहशुद्ध्यर्थंप्राजापत्यप्रत्याम्नायेप्रतिप्राजापत्यंद्वादशब्राह्मणभोज
नपरिगणनयातावत्संख्याकब्राह्मण।निष्क्रतिभूतंद्रव्यंकस्मैचिद्ब्राह्मणा
यहंसंप्रददे।भगवान्पापहाविष्णुःप्रीयतां।अनेनप्राजापत्याचरणेन
ममदेहशुद्धिरस्तु।गोत्रस्यअमुकप्रेतस्यऊर्ध्वदैहिककर्मयोग्यताप्राप्तिः॥

शास्त्रोक्त॰रस्तु। न्यूना॰मस्तु। ततो विष्णुतर्पणं तस्य विधिः। आचमनं। प्राणा
यामः॥ अद्यादि॰ अमुकसगोत्रस्य अमुकप्रेतस्य शास्त्रो॰ प्रेतत्वनिवृत्त्यर्थं स
द्गतिप्राप्त्यर्थं च तृषानिवृत्त्यर्थं विष्णुवैः सूक्तैः आद्यं तयोः पुराणश्लोकत्रया
वृत्त्या विष्णुतर्पणमहं करिष्ये। सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य नाराय
णऋषिः पुरुषो देवता अनुष्टुप् छंदः। अंत्या त्रिष्टुप् विष्णुतर्पणे विनियोगः॥
सहस्रशीर्षा॰गुलं। अतसीपुष्पसंकाशं पीतवाससमच्युतं। येनमस्यंतिगो १२
विंदं न तेषां विद्यते भयं॥१॥ अनादिनिधनो देवः शंखचक्रगदाधरः। अव्य
यः पुंडरीकाक्ष प्रेतमोक्षप्रदो भव॥२॥ लक्ष्मीकांत कृपालुत्वमगतीनांगतिर्भ

व। संसारार्णवमग्नानां प्रसीद पुरुषोत्तम॥३॥ पुरुष एवेदं सर्वं इत्यादि यज्ञेनय
ज्ञं एवत्पर्यंतं प्रत्यृचं आदौ अंते च पुराणश्लोकत्रयावृत्त्या अंजलिं दद्यात्। अतो
देवा इति षडृचस्य सूक्तस्य मेधातिथिर्ऋषिः विष्णुर्देवता आद्या देवी गायत्री छंदः
विष्णुतर्पणे विनियोगः। अतो देवा॰मभिः। ओं अतसीपुष्पसंकाशं॰ श्लोकत्रयं। इदं
विष्णुरित्यादि परमं पदं। अतसी श्लोकत्रयं॥१॥ विष्णोर्नुकमिति षडृचस्य सूक्तस्य
दीर्घतमा ऋषिः विष्णुर्देवता। त्रिष्टुप् छंदः विष्णुतर्पणे विनियोगः। ओं विष्णोर्नुकं॰ व्यः।
अतसी ३ प्र तद्विष्णुः॰ भूरि। अतसी ३ प्रवः पांतमिति षडृचस्य सूक्तस्य दीर्घतमा ऋ
षिः विष्णुर्देवता। आद्यास्तृच ऐंद्र त्र्यजागतं छंदः। विष्णुतर्प॰गः। प्रवः पांत॰ना।

अतसी॰ ३॥ त्वेषमित्था इत्यादि प्रत्येत्या इ वं॥ अतसी॰ ३॥ नवा मित्र इति पंचर्चस्य सू
क्तस्य दीर्घतमा ऋषिः॥ विष्णुर्देवता जागतं छंदः॥ विष्णुतर्पणे॰ गः॥ नवा मित्रो॰ अ
ता॥ अतसी॰ ३॥ संवां कर्मणेत्यष्टर्चस्य सूक्तस्य भरद्वाज ऋषिः॥ इंद्रो विष्णुर्देवते॥ त्रि
ष्टुप् छंदः॥ विष्णुतर्पणे॰ गः॥ ॐ संवां क॰ ता॥ अतसी॰ ३॥ या विश्वासां॰ षां॥ अतसी॰ ३॥ परो
मात्रायेति सप्तर्चस्य सूक्तस्य वसिष्ठ ऋषिः॥ विष्णुर्देवता उरुं यज्ञायेतिसृः॥ ऐंद्र्यश्च
त्रिष्टुप् छंदः॥ विष्णुतर्पणे वि॰ गः॥ ॐ परो मात्रया॰ से॥ अतसी॰ ३॥ न ते विष्णो॰ नः॥
अत॰ ३॥ नूमर्त इति सप्तर्चस्य वसिष्ठ ऋषिः विष्णुर्देवता त्रिष्टुप् छंदः॥ विष्णुतर्पणे १३
विनियोगः॥ नूमर्तो॰ न्तु॥ अतसी॰ ३॥ त्वं विष्णो॰ नः॥ अतसी॰ ३॥ दक्षिणासंकल्पः॥ मु

प्रोक्षितादिकं कृत्वा॥ कृत विष्णुतर्पण कर्मणः प्रतिष्ठासिद्ध्यर्थं हिरण्यदक्षिणां नि॰
ष्क्रयं कस्मै चिद्ब्राह्मणाय॰ दे॥ भगवान् पापहा विष्णुः प्रीयतां॥ ब्राह्मणभोजनं॥ अ
नेन कृत विष्णुतर्पणेन गोत्रस्य प्रेतस्य प्रेतत्व विमुक्तिः॥ ऊर्ध्वषानिवृत्तिः॥ शास्त्रो
क्तफलावाप्तिः॥ वृषोत्सर्गकर्मयोग्यताप्राप्तिः॥ ॥ तदनंतरं स्नानं कृत्वा वृषोत्सर्ग
कर्म॥ चतुरस्रं स्थंडिलं कृत्वा ईशान्यां सहिरण्यं सपल्लवं सर्वौषधी समन्वितं स
प्तधान्योपरि रुद्रकलशं संस्थापयित्वा प्रतिदिशं समीपे शाखां निखाय संस्थाप्य आ
चमनं प्राणायामः॥ स्वस्त्ययन अर्घ्यादि प्रयोगमुच्चार्य॥ भूमिसंस्कारादि हविर्ग्रहणं॥
पिष्टमयं हविः॥ पात्रे अंतर्धाय॥ ॐ पूष्णे जुष्टं गृह्णामि॥ इति त्रिर्गृह्णीयात्॥ चरुं

पंचहस्तौ।शेषान्निमर्शनं।पृथ्व्यास्त्वा जुष्टमासादयामि।आसादनं।पृथ्व्यां त्वा जुष्टं प्रो
क्षामीति प्रोक्षणं।आलोड्य चरुं विधिश्रयणं।स्योना पृथिवीति कलशस्थाप
नं।श्रितान्ति धारणादि आज्यभागांतं कृत्वा।इदं रतीत्यादि तिस्र आज्याहुतीः।
स्रुवेण कृत्वा।इदं रतिरिदं रमध्वं स्वाहा।इह धृतिरिह स्वधृतिः स्वाहा।२।उपसृ
जं धरुणं मात्रे धरुणो मातरं धयं।रायस्पोषमस्मासु दीधरत्स्वाहा।३।ततोऽन्तर
वाजपूषा गायत्री।ॐ पूषा गा अन्वेतु न इति चरुं गृहीतं।पौष्णं चरुं कृत्वा।न्न
रुवः स्वः इति रुद्रकलशं पूरयित्वा त्वं वनमसि सहस्रपोषमिं ग्रायत्वा श्रवो २४
ददत्।अरुतमस्य रिष्टमिज्जान्नं गोपायनं।यावतीनामिदं करिष्यामि।भूयसी

नामुत्तमां सामां क्रियासं।२।त्वं वनमसि सहस्रपोष०क्रियासं।इति मंत्रे
ण दक्षिणे त्रिशूलं वामे चक्रं।वृषपदं ग्रीवायां।यज्ञोपवीतादि यथोक्तमपे
करणादि कृत्वा।रुद्रकलशमादाय आपो हि ष्ठेति नवर्चेन सूक्तेन वृषव
त्सतरीणामभिषेकं कृत्वा।ब्राह्मणं पृष्टं कृत्वा।आचार्यः सहस्रशीर्षेति सूक्त
स्यै पठन् वृषवत्सतरी चाग्निं परितश्चतुर्वारं प्रदक्षिणीकुर्यात्।अग्नेः पश्चा
दुपविश्य प्रयोगमुच्चार्य सव्येन पुच्छान्यादाय दक्षिणेन दर्भान् सर्वौषधीर्यवां
श्च गृहीत्वा षोडशर्चेन पुरुषसूक्तेन तर्पणं कुर्यात्।अंते अतसीत्यादि तिस्रो
किश्च।ततो दक्षिणाभिमुखं उपविश्य।अपसव्यं कृत्वा।पुच्छकुशान् अधोमू

लान्नं कृत्वा सर्वौषधीतिलान् गृहीत्वा प्रेतमनुस्मरेत्। पितृतीर्थेन गोत्र प्रेत वृषवत्स
तरीपुच्छेन तिलोदकं नेऽएवं तर्पणं कृत्वा। सव्यं कृत्वा। आचम्य वृषवत्सतरीणामुत्सर्गं
कुर्यात्। प्रणवमंत्र प्रोक्षणादि अहमुत्सृजामीत्यंतं कृत्वा। पश्चात्सव्येन। एतं युवानं
पतिं वो ददामि तेन क्रीडंतीश्चरथ प्रियेण। मावश्चाचजन्नुषा संविदाना रायस्पोषे
णसमिषामदेम स्वाहा। अनेन मंत्रेण एतं युवानमिति प्रेरणं। ततो मयोभूरित्यनु
मंत्रणं च कुर्यात्। इति क्रमः। एतं युवानमिति पठित्वा दक्षिणस्कंधेन प्रांचं प्रेरयेत्। ७५
सुप्रोक्षणादि। अपसव्यं कृत्वा। गोत्रस्य अमुकप्रेतस्य प्रेतत्वविमुक्त्यर्थं वसुरुद्रादि
लोकप्राप्त्यर्थं शास्त्रोक्तफलावाप्त्यर्थं इमं वृषं वत्सतरीचतुष्टयसंयुक्तं यथाशक्त्यलं

कृतं वृषपदयीवावत्संबितं रुद्रदैवतं गंधाद्यर्चितं अहमुत्सृजामि। वृषदक्षिणखु
रे हस्तेन उदकं निनयेत्। यथोल्लाप्य मयोभूरित्यनुवाकशेषेणानुमंत्रयेत्। ततः
स्विष्टकृदादि ब्रह्मविमोकांतं कृत्वा। अस्य कर्मणः समृद्ध्यर्थं यथासंपन्नेनान्नेन तृ
प्तिपर्यंतन्तोऽनेन पायसेन त्रीन् ब्राह्मणान् अहं तर्पयिष्ये। जगदस्य कर्मांग
देवताः प्रीयंतां। दक्षिणासंकल्पः। ततः कर्मापवर्गसंकल्पः। शन्न इंद्राग्नी इत्या
दि। अस्य वृषोत्सर्गकर्मणः परिपूर्णमस्तु। शास्त्रोक्तफलावाप्तिरस्तु। अनेन वृ॰
गोत्रस्य अमुकप्रेतस्य प्रेतत्वविमुक्तिरस्तु। वसुरुद्रादित्यलोकप्राप्तिरस्तु॥ ॥
ततः स्नानं॥ देवपूजापूर्वकं एकादशाहश्राद्धं सर्वं अपसव्येन। दर्भं च द्रुं। निधा

यसवर्या॰प्रेतश्राद्धेब्राह्मणकार्यं॰अमुकसगोत्रअमुकप्रेतअवनेनिक्ष्वाए
तद्धःपाद्यं।एषवोअर्घः।पूजा।प्रेतैकोद्दिष्टेभ्योनमः।सव्यं।आचमनं।प्राणायामः।३
पुनराचम्य।अपवित्रइत्यादि॰देवताभ्योमयीशेगीत्यएवच।नमः।श्राद्धभू॰
गयायां॰देशकालपात्रद्रव्यश्रद्धासंपत्‌अपसव्यं।दृष्टि॰श्राद्धे॰पवित्रता।
तिलानगृहीत्वा।भूःभुवइत्यादिव्याहृतीः।तत्सवि॰यात्।मधुवाता॰मधुइति
जपित्वातिलान्विकीर्य।अर्घेत्यादि॰गोत्रस्यप्रेतस्यएकादशाहनिमित्तंप्रेत ७६
त्वविमुक्त्यर्थंपङ्क्तिदूषणानिवृत्यर्थंशास्त्रोक्त॰पंप्रेतैकोद्दिष्टविधिनायुष्मदनुज्ञया
श्राद्धमहंकरिष्ये।गोत्रप्रेतअमुकइदंतेआसनं।एकमर्घं।शन्नोदेवीतिपूर

यित्वा।तत्रतिलोसि।इतितिलान्प्रक्षिप्य।अत्रचंदनादिअर्घस्यार्चनविधेःप
रिपूर्णता।चदूपरिपवित्रंमुक्त्वा।पूजा।प्रेतैकोद्दिष्टेभ्योनमः।यादिव्याइत्या
दि॰गोत्रप्रेतएतत्तेअर्घ्यं।सकलमर्घंनिनयेत्।ततोन्युब्जंपात्रं।अरुंतांलोकाः
प्रेतसदनाःप्रेतसदनमसि।प्रेतैकोद्दिष्टेभ्यःस्थानमसि।चदूपरिअत्रचंदनादि
यथादत्तंगंधाद्यर्चनंउपवीतंचगोत्रप्रेतते।वस्त्रादिसंकल्पश्च।समुदादिकं
नत्रधूपकद्दीपक।अर्चनविधेःपरिपूर्णता।सव्यं।आचमनं।अपसव्यं।अप
हताअसुरारक्षांसिपृथिवीतिपात्रमित्यादि॰अमृतेअमृतंजुहोमि।इदंविष्णुरि
त्यादि।एतत्तेविष्णोअन्नंरक्ष।उदकोपस्पर्शनं।इदमन्नंयद्दत्तंयपादास्यमानं

आमान्नं सघृतं गोत्र अमुकप्रेत ते। ततः सूक्तादिजपः। अद्येत्यादि॰ गोत्रस्य अमु
कप्रेतस्य एकादशाहनिमित्तस्य श्राद्धस्य प्रेतैकोद्दिष्टविधेर्यत्कृतं यन्नक्तं तत्तद्यु
ष्मत्प्रसादात्संपन्नं। एतद्दः सूर्यः। संकल्पसिद्धिः। पिंडपात्रे सूक्तादिजपः। समूलदर्भ
स्तरणं। अवनेजनं। गोत्र अमुकप्रेत अवनेनिक्ष्व। ततः पिंडदानं। गोत्र अमुक
प्रेत ते। प्रत्यवनेजनं। अत्राच्छादनादि॰ एतत्तेवासः। नैवेद्यसंकल्पः। अत्राच्छाद
नादि गोत्र अमुकप्रेत ते। पिंडार्चनविधेः परिपूर्णता। अनेन पिंडदानेन गोत्र ११
स्य अमुकप्रेतस्य प्रेतत्वविमुक्तिः। क्षुत्तृषानिवृत्तिः। शास्त्रोक्तफलावाप्तिः सव्यं।
आचमनं। ततः सुप्रोक्षितं। शिवा आपः। सौमनस्यं अक्षतं च। अपसव्यं। दक्षिणा

संकल्पः। रजतदक्षिणानिष्क्र॰ गोत्र प्रेत ते। अक्षय्यकाले गोत्रस्य प्रेतस्य उप
तिष्ठतां। पवित्रमास्तीर्य त्रिली मुदकं निनयेत्। सव्यं। पुनर्दक्षिणा। अस्य हिरण्य॰
वं प्रेतश्राद्ध ब्राह्मणभत्यमहं संप्रददे। अपसव्येन। नमं कर्णेत्रिरिति पिंडप्रक्षे
पः। ततः अस्य श्राद्धस्य यः कश्चिन्न्यूनातिरिक्त इत्यादि॰ अनेन एकादशाहश्रा
द्धेन गोत्रस्य प्रेतस्य प्रेतत्वविमुक्तिः। कुंभदानयोग्यताप्राप्तिः। न्यूनातिरिक्तं सर्वं
परिपूर्णं। अभिरम्यतां। वस्त्रं परित्यज्य सव्यं। स्नानं। अन्यद्वस्त्रं परिधायेत्याचमनं।
प्राणायामत्रयं कुर्यात्। पुनराचमनं। अद्येत्यादि॰ पूर्ववत्। गोत्रस्य प्रेतस्य प्रेतत्व
विमुक्त्यर्थं क्षुत्तृषानिवृत्त्यर्थं कस्मैचिद्ब्राह्मण॰ ददे। भगवान्पापशाविष्णुः प्रीय

तं। एवं एकं यमोद्देशेन। एवमेकं चित्रलेखकोद्देशेन। एवमेकं विचित्रलेख
कोद्देशेन। अपसव्यं। गोत्रस्य प्रेतस्य क्षुत्तृषानिवृत्त्यर्थं शास्त्रोक्तफलावाप्त्य
र्थं यथा दास्यमानाः एकादश सलिलोदककुंभाः सोपस्कराः विष्णुदैवत्याः गंधा
द्यर्चिताः कस्मैचिद्ब्राह्मणाय दास्यमानाः गोत्रप्रेत ते। सव्यं। भगवान् पापप्र
विष्णुः प्रीयतां। अपसव्यं। एभिः सतिलोदककुंभदानैः गोत्रस्य अमुकप्रेतस्य
प्रेतत्वविमुक्तिः क्षुत्तृषानिवृत्तिः। शास्त्रो॰ प्राप्तिः। द्वादशाहकर्मयोग्यताप्राप्तिः। सव्यं
कृत्वा। तीर्थदेवतानां प्रीत्यर्थं न्यूनातिरि॰ सं॰। भद्रं कर्मे॰ विसर्गः॥ इति समापनं॥ १८
ततः स्नानं शुष्कवस्त्रं परिधाय। संक्षेपेण देवपूजां कृत्वा। अद्येत्यादि पूर्ववत्।

प्रयोगः। सव्येन। द्वादशसान्नोदककुंभ नित्यान्न नित्यघट नित्यदीपसंकल्पम
हं करिष्ये। अपसव्यं। गोत्रस्य प्रेतस्य प्रेतत्वविमुक्त्यर्थं। क्षुत्तृषानि॰र्थं कस्मैचि
द्ब्राह्मणाय दास्यमानाः द्वादश सान्नोदककुंभाः वासोपस्कराः विष्णुदैवताः गो
त्रप्रेत ते। एभिर्द्वादश सान्नोदककुंभदानैः गोत्रस्य प्रेतस्य क्षुत्तृषानिवृत्तिः। प्रे
तत्वविमुक्तिः। शास्त्रो॰ प्राप्तिः। नित्यान्नयोग्यताप्राप्तिः। गोत्रस्य प्रेतस्य त्रयोदशाहप्र
भृति संवत्सरं यावत् अहरहः क्षुत्तृषानिवृत्त्यर्थं शास्त्रो॰र्थं। अष्टचत्वारिंशत्यधि
कशतत्रय ब्राह्मणभोजननिष्क्रयीभूतं द्रव्यं कस्मैचिद्ब्राह्मणाय दास्यमानं
गोत्रप्रेत ते। अशक्तस्य तु नित्यान्नसंकल्पनिष्क्रयं यथासंपन्नं द्रव्यं गोत्रप्रेत ते।

अनेन नित्यान्नदानेन गो॰ प्रेतस्य अहरहः क्षुत्तृषानिवृत्तिः। शास्त्रोक्तफला
वाप्तिः। नित्यघटयोग्यताप्राप्तिः। ततो नित्यघटसंकल्पः॥ गोत्रस्य पूर्ववत्। अष्ट
चत्वारिंशत्यधिकशतत्रयसान्नोदककुंभाः सोपस्कराः गंधाद्यर्चिताः। विष्णुदै
वताः। तन्निष्क्रययथा दास्यमानं द्रव्यं गोत्रप्रेतते। सव्यं। भगवान् पापहा विष्णुः
प्रीयतां। अपसव्यं। अनेन सोपस्कर नित्यघटदानेन गोत्रस्य अमुकप्रेतस्य
अहरहः क्षुत्तृषानिवृत्तिः। शास्त्रो॰ प्तिः। नित्यदीपदानयोग्यताप्राप्तिः। नित्य
दीपसंकल्पः। गोत्रस्य प्रेतस्य परलोके तमोनिवृत्यर्थं शास्त्रो॰ र्थं। मृताहप्रभृ १९
तिसंवत्सरं यावत् अहरहस्तमोनिवृत्यर्थं कस्मैश्चि॰ दास्यमानाः नित्यदीपाः

सोपस्कराः विष्णुदेवत्याः गंधाद्यर्चिताः तन्निष्क्रययथासंपन्नं द्रव्यं गोत्र अमु
कप्रेतते। सव्यं। भगवान्॰ प्रीयतां। अनेन दीपदानेन गोत्रस्य प्रेतस्य परलोके
तमोतमोनिवृत्तिः। शास्त्रोक्तफलावाप्तिः। सपिंडीकरणयोग्यताप्राप्तिः। त
तः पूर्वं न कृतं चेत्तर्हि ऋणधेनुसंकल्पः। गोत्रस्य प्रेतस्य ऋणत्रयविमोचनार्थं य
था दास्यमानां ऋणधेनुसंज्ञिकां गां यथोपस्कर सहितां रुद्रदैवतां कस्मैश्चि॰
दास्ये। इत्यादि॥ ततः स्नानं॥ अपसपिंडीकरणं। पूर्वं विश्वेषां देवानां पाद
प्रक्षालनं। पश्चात्पितृणां। अद्येत्यादि। गोत्रस्य प्रेतस्य पितृत्वप्राप्त्यर्थं सपिंडी
करणनिमित्तं गोत्राणां पितृपितामहप्रपितामहानां अमुकाः अमुकश

मणां विश्वदेवपूर्वकं सैकोद्दिष्टं पार्वणविधिना युष्मदनुज्ञया श्राद्धमहं करिष्ये।
शन्नोदेवीति अर्घपात्राणि पूरयित्वा अर्घार्चनविधिं कृत्वा वैश्वदेवार्घं दत्वा। न
नः प्रेतस्यार्घस्य चतुर्थांशं दत्वा। येसमानाः समनसः पितरो यमराज्ये। तेषां लो
कः स्वधा नमो यज्ञो देवेषु कल्पतां। येसमानाः समनसो जीवा जीवेषु मामकाः। ते
षां श्रीर्मयि कल्पतामस्मिं ल्लोके शतं समाः। समानो मंत्रः। समितिः समानी समा
नं मनः सह चित्तमेषां। समानं मंत्रमभिमंत्रये वः समानेन वो हविषा जुहोमि। समा ८
नी व आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति। येस
मानाः इति मंत्र चतुष्टयं पठित्वा गोत्रस्य प्रेतस्य अर्घ्यांशः गोत्रस्य पितुः अमुकश

मणः अर्घेण सह संयुज्यतां। एवं पितामह प्रपितामहाभ्यामपि संयोजनं। ततः
पित्रादिभ्यो अर्घदानं। अर्घादि पिंडदानं चतुर्भ्यो दत्वा प्रेतपिंडस्यावनेजनादि नै
वेद्यसंकल्पांतं कृत्वा। आचम्य। प्रेतस्य पितुः अमुकशर्मणः पिंडेन सह संयुज्य
तां। एवं पितामहस्य प्रपितामहस्यापि। ततः प्रत्यवनेजनादि सर्वं दर्शवत्। अत
ऊर्ध्वं प्रेतशब्दस्थाने एकोद्दिष्टशब्द उच्चारणीयः। स्वधावाचनं। एकोद्दिष्टस्य इत्थं।
श्राद्धं समाप्य। सर्वं। मोक्षधेनु संकल्पः। अपस्त्रियाः सपिंडीकरणं। अद्येत्यादि
गोत्रायाः प्रेतायाः अमुकीदेविदायाः सपिंडीकरणं सपिंडीकरणनिमित्तं गोत्रा
णां मातृपितामही प्रपितामहीनां अमुकीदेविदानां वैश्वदेवपूर्वकं सैकोद्दिष्टं

युष्मदनुज्ञया श्राद्धमहं करिष्ये। शेषं पूर्ववत्। तीर्थदेवतानां ब्राह्मणभोजनं॥ ॥इ
त्यूर्ध्वदैहिकक्रियाविधिः॥ ॥अथ सहगमनविधिः॥ ॥मिताक्षरा पारिजातयोः॥
मृते भर्त्तरि ब्रह्मचर्यं तदन्वारोहणं वेति। आर्त्तार्त्ते मुदिता हृष्टा प्रोषिते मलिना कृ
शा। मृते म्रियेत वा पत्यौ सा स्त्री ज्ञेया पतिव्रता। न म्रियेत समं भर्त्रा ब्राह्मणी शोकमोहि
ता। प्रव्रज्यागतिमाप्नोति मरणादात्मघातिनी। यदि भर्त्ता भक्ता म्रियेत् समं भर्त्रा ति
स्फलं लभेत्। यावच्चाग्नौ मृते पत्यौ न ह्यात्मानं दहेत् क्वचित्। तावन्न मुच्यते नारी स्त्री
शरीरात्तु कर्हिचित्। पतिं कं गगतं प्राणं दृष्ट्वा चैव पतिव्रता। संकल्प्य चात्मनः प्राण ८२
निदं वचनमब्रवीत्। देवैः संपादितो मह्यं पतिस्त्वं सर्वदेवते। त्वया सहगमिष्या

मि भर्त्तात्वं चान्यजन्मनि। इति संकल्प्य सती कृतस्नाना स्वशक्त्या दानपुण्यादि कृ
त्वा ततः ॐ कुमांज नमुकुदाद्यैः स्वशरीरमलंकृत्य च तस्मै न्यः सौवासिनीभ्यः स
मं पायसं घृतमधुमिश्रितं भुंक्ते। सती ग्रास च भक्ष्ये कामं धत्ते। वैधव्यं मा हि नक
दापि स्यात् पत्या वियोगो न मम मास्तु चान्यं। वंध्यात्वमेवं न कदापि चास्तु। बंधूस्तान्
प्रणम्य विसृजेत्। हर्षमना भर्तृगतमनसा स्वगृहं त्यक्त्वा तेराशीर्वाद परा विनर्द्दये
त्। अग्ने युंक्ष्वेति मंत्रेणावडवामारोहेत्। अथवा श्मशानं नीयमानं भर्त्तारमुपयाति २
या। पदे पदे यज्ञफलं लभते नात्र संशयः। पदाति र्वा सती गच्छेदित्यर्थः। आरुह्य शी
घ्रं हरिमुच्चरंती। पथि भक्तैरवाकिरंती। भर्तृपदो याश्मशाने पुष्पुलकोद्गमां

सप्तहस्तप्रमाणास्तुस्मृताकाष्ठमयीकुटी।दक्षिणस्यांदिशिद्वारंचितायामुनि
भिःस्मृतं।विष्णुस्यकुणपंतत्रचितामध्येसयत्नतः।सतीशौचादिकंकृत्वा।अद्ये
त्यादि॰अस्मिन्तीर्थेत्रासिद्धगमनार्थंस्नानमहंकरिष्ये।इतिप्रयोगमुच्चार्य
स्नानांतरंकौसुंभवस्त्रंपरिधाय।ॐकुमांजनस्वाधर्ग्विन्दूषिता।विष्णुंध्यायेति
चितासमीपमांगल्यपिंडान्दद्यात्।स्वहस्तेनप्रतिनिधेनवा।नावितोक्तांतिनि
मित्तंअमुकसगोत्रायैअमुकीदेविदायैमह्यंपरलोकेएषपिंडउपतिष्ठतु। ८२
विष्णोःप्रसादात्।प्रतिनिधिकोवाअमुकसगोत्रायैअमुकीदेविदायैमह्यंपर
लोकगतायांत्वयिनावितोक्तांतिनिमित्तंएषपिंडोमयादत्तःउन्नयंममतिष्ठत्विति।

एवंसर्वेषुनिमित्तस्थानेषुदेयं।।चतार्घंप्रदातव्यंफलैश्चविविधैःशुभैः।चिता
स्थोभगवानग्निर्विष्णुरूपीसनातनः।परलोकेसहायार्थंगृहाणार्घंनमोस्तुते।
ततःसूर्यार्घः।।एषअर्घोमयादत्तःसूर्यसाक्षिंस्वदयतः।प्रसादंकुरुमेदेवअर्घं
गृहाणनमोस्तुते।।अथस्तुतिः।।त्वंब्रह्मात्वंचवैविष्णुस्त्वंरुद्रस्त्वंप्रजापतिः।त्वंसू
र्योविभवश्चाष्टौपरमात्मात्वमेवहि।त्वमेवशरणंविष्णोशरणंउपतिर्मम।स्वर्गेवा
नरकेवात्वंयत्रयत्रगमिष्यति।तत्रनत्रहमहंप्रष्टेस्वर्गमप्येसिचाम्यच।ब्रह्महत्या
दिभिःपापैस्त्वांमोक्ष्यामियमालयात्।अहंब्रह्माह्यहंविष्णुरहंसूर्यश्चदिक्पतिः।
आदित्यश्चंभावनलोपवायुर्द्यौर्भूमिरापोप्यहर्निशंच।एतेसमस्तामममाइसेन

उष्यं च मे देव चराश्च सर्वे। सप्त प्रदक्षिणीकृत्य चितामारोहयेत्सती॥ चरणौ हृदये
भर्तुस्तं ध्यात्वा जगदीश्वरं। इमा नारीरविधवाः सुपत्नीरांजनेन। सर्पिषा संविशंतु।
अनश्रवो नमीवाः सुरत्ना आरोहंतु जनयो योनिमग्रे। अनयर्चा देवतादीनां म
चितामारोहयतु॥ ॥अथ प्रवेशनमंत्रः॥ ॥इदं शरीरं सकलं मदीयं दग्ध्वा हुताश
नो कुरु दिव्यमाशु। तथा स्वभर्तुः कुरु दिव्यदेहं भर्तुः समीपं भगवन् व्रजामि॥ रि
किं मया नकृतं साधु भवेद्यदि तवानघ। इदं स्वशरीरमालिंग्य प्रविशामि हुताशनं। ८३
इत्थं यं सा हि संदृष्ट्वा करतालीं प्रदापयेत्। हरिनामोच्चारणं स्वजनैश्च कारणं॥ ॥
इति सहगमनविधिः॥ ॥सहगमनफलातिशयः॥ ॥ब्रह्मघ्नो वा कृतघ्नो वा मित्र

घ्नो वा यपापवेत्। पुनात्यविधवा नारी तमादाय मृता तु या॥१॥ यदि प्रविष्टो नर
कं बद्धः पाशैः सुदारुणैः। संप्राप्तो यातनास्थानं गृहीतो यमकिंकरैः॥२॥ तिष्ठ
ति विवशो विघ्नो वक्ष्यमाणः स्वकर्मभिः। व्यालग्राहीयथा सर्पं बलादुद्धरते बि
लात्॥३॥ तद्वदुद्धृत्य सा नारी तेनैव सह मोदते। तिस्रः कोट्योऽर्द्धकोटी च यानि
रोमाणि मानुषे॥४॥ तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छति। मृते भर्तरि या नारी स — र्तारं या ५
मारोहेद्धुताशनं॥५॥ अरुंधतीसमाचारा स्वर्गलोके महीयते। मातृकं पैतृकं चै
व यत्र कन्या प्रदीयते॥६॥ कुलत्रयं पुनात्येषां भर्तारं यानुगच्छति। तत्रैव सा भर्तृ
परा स्तूयमाना प्सरोगणैः॥७॥ क्रीडते पतिना सार्द्धं यावदिंद्राश्चतुर्दश। शरी

रार्द्धस्मृतानारीपुण्यापुण्यफलैःसमा॥८॥अन्वारुह्यतुजीवंतीसाध्वीनर्हतिना
यसा॥९॥अयंतुसर्वासांस्त्रीणामगर्भिणीनामबालपत्यानामखंडालसाधारणो
धर्मः।ब्राह्मणीनांतुपृथक्चित्यांनिषेधः।एकचित्यांनदोषः।पृपक्कित्यांसमारो
ह्यनविप्रांगंतुमर्हतीतिविशेषोपादानात्।ब्राह्मिणीभिरेकचित्यासमारोहणंका
र्यमेव।अगर्भिणीभिरबालापत्याभिःस्वर्गाभिलाषिणीभिः॥गर्भिण्यादिभिस्तुमो
क्षकामाभिर्ब्रह्मचर्यपक्षोंगीकर्त्तव्यः॥मोक्षाभिलाषिणीभिरनित्याल्पसुख ८४
स्वर्गार्थमायुर्व्ययोनकर्त्तव्यः।स्वर्गमिछंतीभिर्विप्रस्त्रीभिःएकचित्यांशरीरव्ययः।
ब्राह्मणव्यतिरिक्तानांपृथक्चित्यामपिनदोषः॥ ॥उदकंयासांचतुरोक्तंके

विधव्यंममहरहरस्वाहा।पतिवियोगंमेमाकुरुमाकुरुस्वाहा॥वंध्यात्वदो
षंनाशयनाशयस्वाहा॥दौर्भाग्यंमेमाभूयान्माभूयात्स्वाहा॥एतेउदकयास
मंत्राः॥ ॥सहगमनविधिःसमाप्तः॥ ॥यादृशमितिन्यायान्नमेदोषः॥ ॥
॥संवत्१७६६नाज्येष्टशुदिचतुर्थ्यांरिवौ।लिखितं॥ ॥शुभंभवतु॥ ॥
दीक्षितगोविंदजीसुतदीक्षितहरिशंकरनिक्रियमांणनिपोथिछे॥ ॥ ८५